UNIVERSAL LIBRARY

OU_180489

UNIVERSAL LIBRARY

# ATHARVA VEDA

# PAIPPALADAS

[illegible] 1

Prof Dr Raghu Vira

Sarasvati Vihara Series

EDITED BY

**Raghu Vira**, M. A., Ph. D., D. Litt. et Phil.
*DIRECTOR, INTERNATIONAL ACADEMY OF INDIAN CULTURE, LAHORE*
*IN COLLABORATION WITH OTHER SCHOLARS*

Volume 9

# ATHARVA VEDA OF THE PAIPPALĀDAS

## Books $14^{1.1}$-$18^{26.1}$

Rupees 20/ Shillings 30/-

February 1940

Published by the Director

for

The International Academy of Indian Culture
Lahore, India

*Printed by Mr. Sadhu Ram, M. A., at the Academy's own printing works the Arya Bharati Press*
LAHORE

सरस्वती-विहार-ग्रन्थाः

९

अथर्ववेदीया

# पैप्पलाद-संहिता

काण्डाः १४' '–१८'' '

आचार्य-रघुवीरेण परिष्कृता

मूल्य—रूप्याणां विंशति.                    विक्रमाब्दा. १९९६

प्रकाशयिता—सरस्वती-विहारः, लवपुरम्

एषा संहिता सरस्वती-विहार आर्यभारत्य्-अभिधे मुद्रण-यन्त्रे मुद्रिता

*Text ([illegible]) Introduction and Appendices*
*appear as another*
*volume*

| | | |
|---|---|---|
| | १४.१ | |
| | इन्द्रो बाहुभ्याम् अभरद् चिकित्वान् अपो देवीर् वरुणाय प्रजानन् । | ओं इन्द्रो * मभिरिश * आपो देवी |
| | तम् आदित्या अभ्य् अषिच्यन्त सर्वे राजानम् उग्र बृहते रणाय । | * आदित्याभ्यषिच्यन्तु |
| | ता न आपो राजसूया भवन्तु ॥१॥ | * नापो * वमन्तु |
| पै १ २५ १ | हिरण्यवर्णाश् [शुचय× पावका यासु जात× कश्यपो यास्व् इन्द्र· । | |
| | [या अग्निं गर्भं दधिरे सुवर्णास् ता न आपो राजसूया भवन्तु ॥२॥ | |
| पै २ | [यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम् । | |
| | [या अग्निं गर्भं दधिरे सुवर्णास् ता न आपो राजसूया भवन्तु ॥३॥ | हिरण्यवर्णा इति चतस्र ऋ ४ पठेत् |
| पै ३ | [यासां देवा दिवि कृण्वन्ति भक्ष या अन्तरिक्षे बहुधा भवन्ति । | |
| | [या अग्निं गर्भं दधिरे सुवर्णास् ता न आपो राजसूया भवन्तु ॥४॥ | |
| पै ४ | [शिवेन मा चक्षुषा पश्यतापश् शिवया तन्वोप स्पृशत त्वच मे । | |
| | [घृतश्चुतश् शुचयो या पावकास् ता न आपो राजसूया भवन्तु] ॥५॥ | |
| तै १ ८ ११ मै २ ६ ८ का १५ ६ | अपो देवीर् मधुमतीर् जगृभुर् वाजस्वती राजसूया मयोभुव । | * * * गृभूर् |
| | याभिर् मित्रावरुणाव् अभ्यषिञ्चन् ता [न आपो राजसूया भवन्तु] ॥६॥ | * * °षिञ्चन् |
| | वरुणेन प्रेषिता यन्तु शुभ्रा उत्स देवीर् दधते या हिरण्यम् । | वरुणाने आ * |
| | या ब्रह्मणाप्नुवते सविदानास् ता [न आपो राजसूया भवन्तु] ॥७॥ | * ब्रह्मणाप्नुन |
| शौ ४.२७ ४ | अपस् समुद्राद् दिवम् उद् वहन्ति दिवस् पृथिवीम् अभि ये सृजन्ति । | या * |
| | ये अद्भिर् ईशाना मरुतश् चरन्ति ता [न आपो राजसूया भवन्तु] ॥८॥ | याद्भिर् |
| | या अमृतम् अबिभ्रत या मधु प्रिय या अगृभ्णन्न् ऋषयो देवसख्ये । | यामृत तिभ्रत * * * यागृभ्ण |
| [९]वा १० १[४] तै १ ८ ११ १[४] का | याभिर् इन्द्रम् अत्य् अनयन्न् अरातीस् ता [न आपो राजसूया भवन्तु] ॥९॥ | * * अभ्रनयरातीस्ता। |
| [१५ ६[४] | या जीवयन्ति या अवर्धन्तु ? प्रणयन्ति देवायते दाशुषे मर्त्याय । | * जीवयन् * * प्रा * दाशुशे मर्त्याया |
| | यासां पयो अक्षतम् अक्षतानां ता [न आपो राजसूया भवन्तु] ॥१०॥ | |
| | हिरण्यपाशा स्वजिन्य× पुनाना यास् समुद्रम् अभ्यर्चन्ति धेनव· । | हिरण्यु° स्व ।निय |
| | या× पर्जन्यो वहत्य् अन्तरिक्षे ता [न आपो राजसूया भवन्तु] ॥११॥ | |
| | रथन्तरे बृहद् [या] गीयमाने क्षत्र जिन्वन्ति प्र तिरन्त्य् आयु· । | * बृहर तिरन्त * |
| | याभिस् त्रियान् ? वाजिनो वाजयन्ति ता [न आपो राजसूया भवन्तु] ॥१२॥ | * * * वाजयन्तिन |
| | याभिस् सह वृत्रहा सोमम् इन्द्रो वसोर् ईशानो ऽपिबत् सुतस्य । | * मह्रा |
| | यास् सप्त ऋषय× कवय× पुनन्ति ता [न आपो राजसूया भवन्तु] ॥१३॥ | साप्त |
| | सप्त ऋषयो भरथम् अभ्य् अषिञ्चन्न् अस्मिन् राष्ट्रे अद्भिर् दक्षिणावत् । | आस्मिन राष्ट्रम् |
| | प्रजयेमं सम् अस्यन्तु देवास् ता [न आपो राजसूया भवन्तु] ॥१४॥ | प्रजा इम मसुम त * ता |
| | याभिर् यज्ञं प्राङ्मुख च धीरा याभिस् सोम मधुपृच पुनन्ति । | साम * * |
| | याभिर् इद जीवति विश्वम् एजत् ता [न आपो राजसूया भवन्तु] ॥१५॥ | ता |
| | यासां स्तोका मधुमया बभूवुर् घृत सञ्जान मधु पिन्वत याः । | |
| | यास् सोमपा× पणयन्तु ब्रह्मणस् ता [न आपो राजसूया भवन्तु] ॥१६॥ | * सोमाप * ब्रह्मणास्ता |
| | यासां पवोर् आज्य वाजिनं च सोमस्य प्रसवम् अनु या× पवन्ति । | * पदोराराज्य पवन्ती |
| | अन्तर्वतीस् तृणवत्सा घृताचीस् ता न आपो राजसूया भवन्तु ॥ १७॥ | * * * * नपो * व तु |
| | अजीजनन् तम् उत यास् स्वर्विदा ब्रह्मणास्ये ? या न्यगु । | °जन * उत यम |
| | ¿ असृक राजसूया× पयासि प्रसव ? एक इव सविता भुवनानि विश्वा ॥१८॥ | * * * प्रमावकेव * * * |
| | सोमो राजा भवो राजा पशुपति× पशूनां वरुणो धृतव्रत· । | |
| | ये यन्ति देवास् तेते क्षत्र दत्त्वायुर् ओज· ॥१९॥ | दत्वायोर * |
| का ३९ १ | आस्थाद् उद् अस्थाद् अजनिष्ट विप्रो मृधो व्य् अस्थाद् अशिशीत बाहू । | * * अस्थाज जाजनिष्ठविप्रो * * आस्थरशशी |
| [४]का समपृक्षि | आरे बाधिष्ठा निर्ऋतिं पराचैस् समवृक्त ? रश्मिभिस् सूर्यस्य ॥२०॥ | * बाधिष्ठ निर्ऋतिः [तवह |
| | ॥का° १॥ | |
| नीलरुद्रोपनिषदि १–१७ | १४ २ | |
| | अपश्यं त्वावरोहन्तं दिवत× पृथिवीम् इव । | अपश्यन् |
| | अपश्यम् अस्यन्तं रुद्रं नीलग्रीवं शिखण्डिनम् ॥१॥ | |
| | दिवत उग्रो ऽवारुक्षत् प्रत्य् अष्ठाद् भूम्याम् अधि । | दिवरु उग्रमद् * * |

| | | |
|---|---|---|
| | जनास पश्यतेम नीलग्रीव विलोहितम् ॥२॥ | |
| | एष एत्य् अवीरहा रुद्रो जलाषभेषजी । | एवैत वीरहा |
| | वि[ते]ऽक्षमम् अनीनशद् आ वाचीकारो व्य् एतु ते ॥३॥ | * * क्षेपम् |
| | नमस् ते भवभामाय नमस् ते भवमन्यवे । | * * भवतामाय * त * |
| | नमस् ते बाहुभ्याम् उतोत त इषवे नमः ॥४॥ | इषव * |
| | याम् इषु गिरिशन्त हस्ते बिभर्ष्य् अस्तवे । | * उस्तं * हस्तेर् |
| | शिवां गिरिश ता कृणु मा हिंसीः पुरुष मम ॥५॥ | नम |
| वा ११ ४ ते ४ ५ १ २ का १७ ११ | शिवेन वचसा त्वा कृच्छ्राछ वदामसि । | कृच्छ्राछा वदाममसि |
| [कपि २७ १ | यथा नस् सर्वम् इज् जगद् अयक्ष्मं सुमना असत् ॥६॥ | येथ इसत् |
| ते १ का कपि | या त इषुश् शिवतमा शिवं बभूव ते धनुः । | |
| | शिवा शरव्या या तव तया नो मृड जीवसे ॥७॥ | शिवा * * तवं |
| वा २ ते मा कपि | या ते रुद्र शिवा तनूर् अघोरापापकाशनी । | °काशिनी |
| | तया नस् तन्वा शंतमया गिरिशन्ताभि चाकशीहि ॥८॥ | गिरिशत्वाभि चाकशा |
| वा ६ ते २ का कपि | असौ यस् ताम्रो अरुण उत बभ्रुर् विलोहितः । | * यास् ताम्रं वर्ण * बभ्रु विलोहितं |
| | ये चेमे अभितो रुद्रा दिक्षु श्रितास् सहस्रशो ऽवैषां हेड ईमहे ॥ ९ ॥ | * * अभितो श्रृतस् महस्रशो * हेडा * |
| वा ७ ते ३ का कपि | अदृश्रन् त्वावरोहन्त नीलग्रीव विलोहितम् । | अदृश्य त्वाविरोहित °ग्रव * |
| | उत त्वा गोपा अदृश्रन्न् उत त्वोदहार्य । | * दा गोपादृश * °हार्या |
| | उतो त्वा विश्वा भूतानि तस्मै दृष्टाय ते नमः ॥१०॥ | * दा |
| वा ८ ते का कपि | नमो अस्तु नीलशिखण्डाय सहस्राक्षाय वाजिने । | * स्तु नीलशिखण्डाय |
| | अथो ये अस्य सत्वानस् तेभ्यो ऽहम् अकर नमः ॥११॥ | * * स्य |
| वा १४ ते ४ का कपि | नमांसि त आयुधायानातताय धृष्णवे । | |
| | उभाभ्याम् अकर नमो बाहुभ्यां तव धन्वने ॥१२॥ | * अकरं |
| वा • ते ३ का कपि | प्र मुञ्च धन्वनस् पर्य् उभयोर् आर्त्न्योर् ज्याम् । | * * * परि उभायोर् * ज्यम् |
| | याश् च ते हस्त इषवः परा ता भगवो वप ॥१३॥ | *चं ते हस्त इषवः परा ता भगवो * |
| वा १३ ते ४ का कपि | अवतत्य धनुस् त्व सहस्राक्ष शतेषुधे । | अवतिभ्य °पुते |
| | विशीर्य शल्यानां मुखा शिवो नश् शम्भुर् आ चर ॥१४॥ | विशय शल्याणा |
| वा १० ते का कपि | विज्यं धनुश् शिखण्डिनो विशल्यो बाणवां उत । | * देनुश बानवा * |
| | अनेशन्न् अस्येषवश शिवो अस्य निषङ्गथिः ॥१५॥ | अन्येशन्यस्य इषवश् * स्य निषङ्गनी |
| वा १२ ते का कपि | परि ते धन्वनो हेतिर् अस्मान् वृणक्तु विश्वतः । | * * धन्विनो हेति यस्माद्वृनक्तु * |
| °कुर्वान् अस्मन् | अथो य इषुधिस् तवारे अस्मिन् नि धेहि तम् ॥१६॥ | * य येषुधिस्तव आरे स्मिन् बि * * |
| वा ११ ते का कपि | या ते हेतिर् मीढुष्टम हस्ते बभूव ते धनुः । | * * हेति हतिन् मधुष्ठम |
| | तया त्व विश्वतो ऽस्मान् अयक्ष्मया परि भुज ॥१७॥ ॥का° २॥ | भुजा |
| | | ॥ इत्यथर्वणिकपैप्पलादयष्टशाखाया चतुर्दशस्यार्धे ॥ |

## १४ ३

| | | |
|---|---|---|
| | सुपार्श्वा कामदुघा न आगन् शतौदना पयसा पिन्वमाना । | * * नागा * * * |
| | ऊर्जं दुहानापस्फुरन्ती यजमानस्य प्रतिरन्त्य् आयुः ॥१॥ | पतिरन्त * |
| | गृभ्णामि वशाम् उशतीं स्वस्त्याम् ऊर्जस्वतीम् अनमीवां साध्याम् । | गृभ्नामि * * यस्वस्तय * * साध्य |
| | विश्वो लोको मम देवेष्व् अस्तु ॥२॥ | * लोक |
| | शतौदना कामदुघा ह्य् एषा नैनां हिंसीर् अश्विना जहृषाणः । | शतोदनां जहिषाणो |
| | अप्य् एतु देवा अपि गच्छतु दिशः ॥३॥ | गश्चत द्विषः |
| | आ रभस्व ब्रह्मणा वैश्वदेव्या शतौदनां शतम् आ च मा नो स्य ? । | * * ब्राह्मणा वैश्वदेव्य |
| | समर्पय ? रश्मिना पर्वतेन स्वर्ग लोकम् अधि रोहयैनम् ॥४॥ | रोहयनम् |
| | ८ धृष्णु ह्य् एना विश्वधा नि कृन्त अपघ्नोश् चरम् इरया ससृजे । | * * * विश्वता परया संसृजी |
| | ८ मा विराजो दुहितेर्या ससत् कामकाम यजमानाय दुहाम् ? ॥५॥ | |
| °शौ ९ ५ ४° | यथापरु विशसन् माभि मस्थाः कृणुष्व म एनाम् आधेयां पृथक् । | यथापरि विषस माति * * मेनाम् * * |
| | अघ देवा मानुषी या पराभूव छतौदना पुरुरूपा सपर्णा ॥६॥ | * देवा |

| | | |
|---|---|---|
| | द्विपाद् द्विहस्त× पुरुषो महान् अयोन ? वनस्पतिं बिभर्ति । | द्विपाद् |
| | सायकाग्रं तेन परूंषि प्रविद्वान् भग्न भायान् ? शतौदना देवीं शतधा व्यू अस्य ॥७॥ | * * * * अग्नाया * * * |
| | एतं भग्नं चर्मणि कृत्तम् आधत् तम् अग्रमयं शतधा व्यू अस्य । | एत * * कृन्तम् * * अग्रमाय |
| | समुत्सृजन्न् अविधानानि सर्वा रायस् पोषं यजमानाय धेहि ॥ ८ ॥ | * ॰नानि सर्वा |
| 'शौ ५' | ऋचा कुम्भीम् अध्य् अग्नौ श्रयामि भूम्यां भूत्वा भूमिम् अधि धारयामि। | ऋच |
| | अपो मांस बिभ्रती मा व्यथिष्ठा मा त्वा चि[द]द् इषुभिर् मेनिभि× पिशाच. ॥९॥ | आपो मेनभि- पिशाचा |
| पै ५ १३ ६ | ऊर्ध्वा प्रेहि माप ¿ व्यक्ता व्यू अस्य रजो अन्तरिक्षम् ? । | * * साप |
| | रक्षांसि सर्वा तीर्त्वा यथा रोह दिव स्वम् ॥१०॥ | |
| | दिव प्रेहि शतौदने सहस्रस्यायन भव । | शतोदन |
| | अयुत प्रयुत ¿ अथाक्षतुर् भवतात्तमां ? स्वर्गं लोकम् आ रुहा ॥११॥ | स्वग |
| | शतौदनां शतधा भक्षयन्ति शतारोहां रोहसि यो दधाति । | * * * शतारोहा |
| | वामदेव्यं नौधसम् अस्या× पक्षौ तृतीये नाके अधि तिष्ठति श्रुना ॥१२॥ | श्रुना |
| | शतौदना शतधा कल्पमाना शत रूपाणि कृणुते स्वर् यती । | शतौदना * कल्पमाना * * कृणुती |
| | सा नो देवी सुहवा शर्म यच्छत् ततो मृडात ईदृशो ॥१३॥ | * * देवाम * * यच्छत् तथो |
| | शतौदना द्वादशाहेन कल्पते शतं इष्टानि ससृजे स्वर् यती । | वृष्टयानि |
| | सर्वान् यज्ञान् पारयन्ती परस्तात् सा दातार रायस् पोषे दधाति ॥१४॥ | सर्वाण्यज्ञानि प्रयाने द ानि |
| | अभि प्रेहि शतौदने जनान् सोमसत्वनः । | जाना * |
| | यज्ञांस् त्वं सर्वान् आप्त्वा कामप्राव्यायन ? भव ॥१५॥ | यज्ञम * * ओप्त्वा |
| | अभि प्रेहि शतौदने यज्ञेन यज्वरी भव । | शतौधने यज्ञेना यज्वनिरव |
| 'शौ १० ९ ५' | या देवयोनिं रोहसि यज्ञादस् त्रिदिव दिवः ॥१६॥ | * देवयानि रोहांमि |
| | इडापक्षी प्रथमा शतौदना सत्य हि मध्यम् अमृत शिरस् तव । | इडापती प्रमाश शतौद(उपरि ने)ना |
| | उभे देवि रोदसी या पृणासि ॥१७॥ | * * रोषमि * पृणामी |
| | ऋचं श्रोण्यौ सक्थ्यौ तन्वो अकृषे बाहू उत उद् बलाय कम् । | ऋच (उपरि द) * स्मक्तौ तन्वौ ओव |
| | वनिष्ठुर् जठरं सानु पार्श्वे सर्वान् लोकान् शतौदना सम् आप ॥१८॥ | अनिष्ठ * आनि * मर्वा लोका आप |
| | चक्षुष्मती प्रथमा शतौदना सूर्यो ह चक्षुर् उत चन्द्रमास् तव । | ॰मतीम चन्द्रमम * |
| | विश्वैर् देवैर् ऋतुभिश् च नद्धा सा दातार तृप्त्या तर्पयासि ॥१९॥ | विश्वैर् नद्धाम तर्पयामि |
| | शतं पयांसि शतम् अस्या वत्साश् शतधा पक्वानि वि भजन्त्य् एनाम् । | पक्वाणि |
| | सप्त लोकान् दिव्यान् पित्र्यांश् चैतान् जिगेथ प्रथमा शतौदने ॥२०॥ | * लोका * पिता एता जिगेत प्रथमाश * |
| | सहस्रेण शतमाना यद् एषि लोकान् जिगेथ प्रथमा शतौदनं । | लोका जिगेत |
| | सर्ववेदसम् एतु वाजपेय सर्वान् लोकान् शतौदना सम् आप ॥२१॥ | * इतु * मर्वा लोका शतौदना * आपः |
| | इन्द्र पपाथ प्रथमां शतौदनां सप्त ऋषिभ्यस् सुमनस्यमान । | * प्रपाथ प्रथमाश शतौदनाम् |
| | तयासुराणां बलम् ओज आ दधे तया रुरोह विष्टपो देवलोकान् ॥२२॥ | मया * * * * मया * * ॰लोका |
| | विश्वामित्रो ऽय जमदग्निर् अत्रिर् भरद्वाजो गौतमो ऽय वसिष्ठ. । | |
| | इद पक्व कश्यपस् सप्तम× प्राश्नन्तु प्रथमां शतौदनाम् ॥२३॥ | सप्तमा * पथमान शतौदना |
| | ज्योतिष्मती× प्रथमाश् शतौदनास् त्रीणि ज्योतींषि कृणुते स्वर् यती । | |
| | तां दातार उप जीवन्ति तत्र यत्र देवैस् सधमाद मदन्ति ॥२४॥ | * दातारम् देव सधमान पदन्ति |
| | छन्द×पक्षा बृहती शतौदना त्रीणि छन्दांसि ससृजे स्वर् यती । | ॰पक्षाद * शतौदनाम |
| | ऋतूनाम् अधिराज सवत्सर पतिमस्याधिवम् ? ॥२५॥ | |
| | अभि क्रन्दस्य अग्निष्टोमम् अतिरात्र शतौदने । | * * ॰ामि॰ |
| | यज्ञांस् त्वं सर्वान् आप्त्वादित्यम् अग्निं वि ष्णुहि ॥२६॥ | यज्ञाम |
| | अश्वमेधम् अतिक्रम्य द्वादशाह शतौदने । | अश्वमध्यम् |
| | त्रिरात्र सानुम् आप्त्वा वाजपेयेन कल्पसे ॥२७॥ | कल्पत |
| | ये सहस्रैर् ईजाना अग्निहोत्रहुताश् च ये । | * सहस्रैर् ईजानाग्नि॰ |
| | यज्ञे ये सर्वैर् ईजानास् तान् आप्नोति शतौदना ॥२८॥ | * * सर्वैर् |
| | सं ते परूंषि सुभगे ददामि स ते मासान्य् ऋतजा ? भवन्ति । | मासा नदत्ता * |
| | अस्थि यत् ते शमिता चचार [त]त् ते त्वष्टा विहुतं मिष् कृणोतु ॥२९॥ | * यम विहृत * कृणतु |
| | ये यज्ञेन जिता लोका यानि छन्दांसि भेजिरे । | छन्दामि * |
| | सर्वांस् तान् लोकान् आप्नोति यो ददाति शतौदना[म्] ॥३०॥ ॥का॰३॥ | |

| | | |
|---|---|---|
| शौ १० ४०, ५० | **१४ ४** | |
| | इषिरा योषा युवतिर् दमूना | * यूखा * दमूना |
| | रात्री देवस्य सवितुर् भगस्य । | |
| शौ अश्वक्षभा * सभृत-(स- | अश्वक्षरा ? सुहवा संभृतश् श्रीर् | * * °त शीर् |
| [भृत वा) | आ पप्रौ द्यावापृथिवी महित्वा ॥१॥ | * बभ्रोर् |
| शौ नाना अति (अवि, अभि वा) विश्वान्य् अरुहद् (अर्हद् वा) गभीरो वर्षिष्ठम् अरुहन्त. (अरुहन्त, अरुहत, अर्हति वा) श्रविष्ठा (श्रविष्ठा, श्रमिष्ठा वा) | अभि विश्वान्य् अर्हद् गभीरोद् | * विश्वां |
| | वर्षिष्ठम् अर्हद् अश्रविष्ठा । | |
| शौ नाना उशती (°तीं वा) रात्र्य् अनुमाम ग्राहि (ग्राहिं, ग्रात्रि, प्राहि वा) तिष्ठते | उशती रात्र्य् अवसानभद्राद् ? | |
| | वि तिष्ठते मित्र इव स्वधाभि· ॥२॥ | इन * |
| शौ नाना वर्ये * * सुजात आजगन् (अजागन्, आजागन् वा) रात्रि * इह स्याम् | नर्ये वन्द्र सुभगे सुजाता | निर्ये |
| | चाम्रि ? रात्रि सुमना य्य् अस्याम् । | |
| एव शौ | अस्मांस् त्रायस्व नर्याणि जाता | अस्मा भूयस्व निर्याणि * |
| शौ अथो यानि | थिया यानि गव्यानि पुष्ट्या ॥३॥ | |
| शौ पी(पीं वा)पस्य | सिंहस्य रात्र्य् उशती निपस्य | * रात्रि |
| | व्याघ्रस्य द्वीपिनो वर्च आ ददे । | * द्वेपनो वर्चांधे |
| | अश्वस्य ब्रध्न पुरुषस्य मायु | माय |
| शौ विभाती (°ती वा) | पुरु रूपाणि कृणुषे विभाती ॥४॥ | कृणुर्षी * |
| शौ रात्रिम् अहि (भनु वा) | शिवां रात्रिम् अह्नि सूर्यं च | |
| | हिमस्य माता सुहवा नो अस्तु । | यमस्य |
| शौ अश्व (अस्य वा) स्तो मस्य * नि बोध * * * * द्विक्षु | अश्वस्तोमस्य सुभगे ऽव बोध | तोध |
| | येन त्वा वन्दे विश्वासु विक्षु ॥५॥ | येरनु * * विश्नामे * |
| | स्तोमस्य नो विभावरि | |
| | रात्रि राजेव जोषसे । | मोषसी |
| शौ असाम सर्ववीरा भवाम | यथा नस् सर्ववीरा भवामस् | |
| | सर्ववेदसो व्युच्छन्तीर् अनूषस ॥६॥ | * विश्छन्तीरनूक्रम |
| शौ दधिषे [(धना वा) | शम्या ह नाम तरुषे ? | श्रम्या |
| शौ मम दिप्सन्ति ये धना | ८ विपृच्छन्ती योजनाम् ? । | |
| शौ नाना रात्रीहिताम (रात्रीहिताम, रात्रिहिताम, रात्रि हिताम वा) सुतपा | रात्रि हीर्त्रानसद्पात ? | |
| शौ य(यत् इति साधीयान् पाठ) स्तेनो न विद्यते यत् पुनर् न विद्यते | स्तनो न विद्यते ॥७॥ | * न्व * |
| शौ * * चमसो न विष्टो (विष्टो, शिष्टो वा) | भद्रासि रात्रि तपस्तो नु विष्टो | |
| शौ विश्व (विष्व, विष्वङ् वा) | विश्व गोरूप युवतिर् बिभर्षि । | युवतिद् (उपरि २) * |
| शौ * मे उशती वपूषि प्रति त्वां (त्व वा) दिव्या नक्षाम् (नक्मा, नक्ष्मा वा) अमुक्था (अमुक्षा वा) | चक्षुष्मती ८ वेयुवनी वरूप· प्रत्यां दिर्त्यां विश्यां अरुकमम् अमुग्धः ? ॥८॥ | |
| एव शौ | यो ऽद्य स्तेन आयत्य् अघायुर् मर्त्यो रिपुः । | युभ्य स्तनाद्येत्वघायु मृत्यो * |
| [1] शौ रात्री तस्य प्रतीत्य | रात्री तस्य प्र गीयस्व ? प्र ग्रीवा× प्र शिरो हनत् ॥९॥ | गीवा * * * |
| | प्र पादौ न यथायति ? प्र हस्तौ न यथाशिषत् । | * * * यताहतः बनाशिषत् |
| | यो मलिम्लुर् उपायति स संपिष्टो अपायति ? । | * मुल्लमुलपावति * * तपायति |

| | | |
|---|---|---|
| एवं शौ (अपायतः वा) | [ अपायति स्वपायति शुष्के स्थाणाव् ] अपायति ॥१०॥ | |
| एव शौ | [ अन्ध रात्रि ] तृष्टधूमम् अशीर्षाणम् अहिं कृणु । | तिष्टधूममशीर्षाणिम् * * |
| शौ अक्ष्यौ वृकस्य निर् जह्यास् तेन | हनौ ? वृकस्य निर् जह्य् आ त्व् एनं द्रुपदे जहि ॥११॥ | हनो * * * * त्वेन नृपते * |
| [ त द्रुपदे * | ये ते रात्र्य् अनड्वाहस् तीक्ष्णशृङ्गास् स्वाशवः । | एते रात्रिय् * °शृङ्गयाइवामव |
| | तेभिर् नो अद्य पारयाति दुर्गाणि विश्वहा ॥१२॥ | विश्वह |
| | रात्रिंरात्रिम् अरिष्यन्तस् तरेम तन्वा वयम् । | तरेम * * |
| एव शौ | गम्भीरम् अप्लवा इव न तरेयुर् अरातय. ॥१३॥ | * अप्नवापुष न तरेयुर् * |
| शौ प्रपतन्नपवान् | यथा श्यामाक× प्रपतन्नेविर्षां ? नानुविद्यते । | * सान्याक |
| | एवा रात्रि प्र पातय यो अस्मां अभ्यघायति ॥१४॥ | रमा अभ्यगायती |
| शौ * * वासो गोअजम् (गोरजम्, | अप स्तेन वासमथं गो[म]थम् उ[त] तस्करम् । | * रतेन् |
| [ गोरज, गोअज वा) | अथो यो अर्वतश् शिरो अभिधाय निनीषति ॥१५॥ | * * उवतश * मिधाय * |
| एव शौ | यद् अद्या रात्रि सुभगे विभजन्त्य् अयो वसु । | * अद्ि * * विभजन्नयो वसु |
| शौ यदेतद् * भोजय * * उपायसि | यथेद् अस्मान् इनाजय ? यथेद् अन्यान् उपायति ॥१६॥ | यथय |
| [ (°ति वा) | उषसे न× परि देहि सर्वान् रात्र्य् अनागसः । | पेहि सर्वा रात्री अनाकश |
| [1]शौ भजाद् ( भजद् वा ) | उषा नो अह्न आ भजाद् अहस् तुभ्य विभावरि ॥१७॥ ॥का°४॥ ॥अनु°१॥ | जुषाणो अह्नाभजद् * * विभावरी |
| | इत्यथर्ववेदे पैप्पलादशाखायां चतुर्दशः काण्डम् समाप्त. ॥ | इत्यथवणिव. पै° |
| | | ओं नमो गणेशाय ॥ ओं नमो ज्वालाभगवत्यै |
| तै ४ ४ १२ मै ३ १६ ४ का | १५ १ | ओं नमस्तिलोत्तमायै ॥ ओं अथ पञ्चदशो |
| [ २२, १४ | | धाय लिख्यते ॥ ॥ |
| | ८ सम्यक् दिग्भ्य× पवते संस्तव्यं मधो रजो ? माधव× पात्व् अस्मान । | ओं मम्यर माधन * * |
| | अग्निर् देवो दुष्टरीतुर् अदाभ्य इद क्षत्र रक्षतु पात्व् अस्मान् ॥१॥ | * * दुष्टरीदुरिनाभ्य |
| | रथन्तरं सामभि× पात्व् अस्मान् गायत्रेण छन्दसा विश्वरूपम् । | |
| | ८ द्वादशानां विष्ठया स्तोमो अह्नां समुद्रो व्यच ? इदम् ओज× पिपर्तु ॥२॥ | द्वा°शा इथय * * * व्याच्य तम् * * |
| | उग्रा दिशाम् अभिभूतिर् वयोधाश् शुचिश् शुक्रे अहन्य् ओजस्ये । | अहय् ओ नम |
| | इन्द्राधिपति× पिपृताद् उतो नो महत् क्षत्र विश्वतो धारयेदम् ॥३॥ | * * उतं |
| | बृहद् राष्ट्रं क्षत्रभृद् वृ[द्ध]वृष्ण्य त्रिष्टुभौजस् सुकृतम् उग्रवीरम् । | * * * वृवृष्णि |
| | इन्द्रस् स्तोमै× पञ्चदशान वर्च इद वातेन सगरेण रक्षतु ॥४॥ | इ द्र |
| [1] तै मै सहयशा का सहाशया | प्राची दिशां सहदिशां ? सहस्वती विश्वे देवा× प्रावृषाह्नां स्वर्वती । | प्रावृषहा * |
| | इद क्षत्र दुष्टरम् अस्त्व् ओजो ऽनाधृष्य सहस्य सहस्वत् ॥५॥ | महस्व महस्वती |
| | वैरूपे सामन्न् इह तच् छकेयं जगत्यैन विक्ष्व् आ वेशयामि । | * सामन जगत्येतु वृक्ष * * |
| | विश्वे देवास् सप्तदशेन वर्च इदं क्षत्र सलिलवातम् उग्रम् ॥६॥ | सलिलावतम * |
| | धर्त्री दिशां क्षत्रम् इदं दधर्तूपस्थाशानां मित्रवद् अस्त्व् ओज । | दधतुउपस्थाशाना |
| | मित्रावरुणा शरदाह्ना जिगत्नू अस्मै क्षत्राणि महि शर्म यच्छतम् ॥७॥ | * * जिगभू |
| | वैराजे सामन्न् अधि मे मनीषानुष्टुभा सभृत वीर्य सह. । | * साम य |
| | इद क्षत्र मित्रवद् आर्द्रदानु मित्रावरुणा रक्षतम् आधिपत्ये ॥८॥ | मित्रवदार्न्वोजा * रक्षतुम् * |
| | सम्राड् दिशां सहसाम्नी सहस्वत्य् ऋतुर् हेमन्तो विष्ठया न× पिपर्तु । | * * °सम्नी विष्णया * |
| | ओषजाता बृहती तु शाक्वरीम यज्ञम् अवतु ? नो घृताची ॥९॥ | °जाना अमृतान् * * |
| | स्वर्वती सुदुघा न× पयस्वती दिशां देव्य् अवतु नो घृताची । | * * न |
| | त्व गोपा× पुरएतोत पश्चाद् बृहस्पते याम्यां युङ्ग्धि वाचम् ॥१०॥ | . युग्धि * |
| | ॥का°१॥ | |
| | १५.२ | |
| [ २२ १४ | | |
| तै ४ ४.१२ मै ३.१६ ४ का | स्तोमैकविंशो भुवनस्य पत्नि विवस्वद्वाते अभि नो गृणीहि । | * * * विश्वग्वाते |

| | | |
|---|---|---|
| | घृतवती सवितर् आधिपत्यै× पयस्वती रन्तिर् आशा नो अस्तु ॥१॥ | * सविताधित्ये |
| तै मै का | ऊर्ध्वा दिशा रन्तिर् आशौषधीनां सवत्सरेण सविता नो अह्नाम् । | * दिश |
| | रेवत् साम्नां पङ्क्तिश् च छन्दसाम् अजातशत्रुस् स्योना नो अस्तु ॥ २ ॥ | |
| तै मै का | विष्कम्भो दिवो धरुण× पृथिव्या अस्येशाना जगतो विष्णुपत्नी । | * * दरुणः * यस्येशाना * * |
| | विश्वव्यचा इषयन्ती सहोभिस् स्यो[ना] नो अस्त्व् अदितेर् उपस्थे ॥३॥ | * ऋषयन्ती |
| तै मै का | ध्रुवा दिशां विष्णुपत्न्य् अघोरास्येशाना सहसो या मनोता । | * * विष्णुपत्न् |
| | बृहस्पतिर् मातरिश्वोत वायुस् सध्वाना वाता अभि नो गृणन्तु ॥४॥ | * मरुतोस्योत * मध्वाना * अपि नस्कृणोतु |
| | यो न× पिता जनिता यो विधर्ता यो नस् सतो अभ्य् आ सज् जजान । | स्वतो * * * जनान |
| ऋ १० ८१ १३ ४ तै ४ ६ २ १ | स आशिषा द्रविणम् इच्छमान× प्रथमस् स नो वर आ विवेश ॥५॥ | |
| तै ४ २ ७ १ | अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । | |
| | वपां ते अग्निर् इषितो वि रोहतु ॥६॥ | अपांम * * इषतो |
| मै २ | यद् अग्ने चन्द्र यत् पूत यच् छुक्र यच् च यज्ञियम् । | जज्ञिय |
| | तद् देवेभ्यो भरामसि ॥७॥ | |
| वा १२ १०४ तै | इषम् ऊर्जम् आभृता ? यज्ञस्य योनौ महिषस्य धामन् । | योना महिषस्य धाम |
| | आ नो गोषु विशत्व् आ प्रजायां जहामि सेदिम् अजराम् अमीवाम् ॥८॥ | * * * विशस्त्वा * * मेधिम् * * |
| | ॥का॰२॥ | |
| शौ १० ४४ | १५ ३ | |
| | आयुषो ऽसि प्रतरण विप्र भे[ष]जम् उच्यसे । | |
| १४ शौ | तद् आञ्जन त्वं शंताते शम् आपो अभयं कृतम् ॥१॥ | यद् आञ्जनि भ्र * अशिनायो मव * |
| | यो हरिमा जायान्यो ऽङ्गभेदो विशल्पक । | * * जायांया |
| | सर्वं ते यक्ष्मम् अङ्गेभ्यो बहिर् निर् हन्त्व् आञ्जनम् ॥२॥ | बहिर् * * * |
| | आञ्जन पृथिव्यां जात भद्र पुरुषजीवनम् । | पुरुषा॰ |
| १४ शौ | कृणोत्व् अप्रमायुकं रथजूतिम् अनागसम् ॥३॥ | कृणोतुप्रमायिक ॰जूतम् अनागम् |
| | प्राण प्राणं त्रायस्वासो ऽसवे मृड । | त्रायस्व अमवो * * |
| | निर्ऋते निर्ऋत्या न× पाशेभ्यो मुञ्च ॥४॥ | |
| | सिन्धोर् गर्भो ऽसि विद्युतां पुष्पम् । | |
| | वात× प्राणस् सूर्यश् चक्षुर् दिवस् पय. ॥५॥ | |
| | देवाञ्जन त्रैककुद परि मा पाहि विश्वत. । | देवाजनि त्रीककुद |
| | न त्वा चरन्त्य् ओषधयो बाह्या× पर्वत्या उत ॥६॥ | |
| | वीद मध्यम् अवासृजद् रक्षोहामीवचातनम् । | वीर |
| १४ शौ | अमीवास् सर्वांश् चातयन् नाशयद् अभिभा इत ॥७॥ | अमीवा * चातय नाशयतापिवाहिसा |
| | बह्व् इद राजन् वरुणानृतम् आह पुरुष. । | |
| | तस्मात् सहस्रवीर्य मुञ्च न× पर्य् अंहस ॥८॥ | |
| | यद् आपो ऽघ्न्या इति वरुणेति यद् ऊचिम । | * * * यति वरुणेन * * |
| | तस्मात् सहस्रवीर्य मुञ्च न× पर्य् अंहस. ॥९॥ | |
| | मित्रश् च त्वा वरुणश् चानु प्रेयतुर् आञ्जन । | * * * * * प्रदुजन |
| शा कोशेषु भूयिष्ठ ओहतु | तौ त्वानुगत्य दूरं भोगाय पुनर् ओहतु. ॥१०॥ ॥का॰३॥ | * त्यानकत्य ओहतु |
| शौ १० ४५ | १५ ४ | |
| | ऋणाद् ऋणम् इव सं नय कृत्यां कृत्याकृतो गृहम् । | |
| | चक्षुर्मन्त्रस्य दुर्हार्द× पृष्टीर् अप शृणाञ्जन ॥१॥ | शृणाजनम् |
| | यद् अस्मासु दुष्वप्न्यं यद् गोषु यच् च नो गृहे । | |
| ॰शौ अनामगस त (त्व, त्वच, [तच वा) च दुर्हार्दे | मामगतस्य ? दुर्हार्द× प्रिय× प्रति मुञ्चताम् ॥२॥ | प्रिय * * |
| | अपाम् ऊर्ज ओजसो वावृधानम् अग्नेर् जातम् अधि जातवेदसः । | * ऊर्जोजमो |
| | चतुर्वीरं पर्वतीयं यद् आञ्जन दिश× प्रदिश× करद् इच् छिवास् ते ॥३॥ | * पर्वत * * * * कदुविश्छवास् * |
| | चतुर्वीरं बध्यत आञ्जन ते सर्वा दिशो ऽभयास् ते भवन्तु । | * बध्यता यजन्ते * * * * * |
| १४ शौ | ध्रुवस् तिष्ठासि सवितेव चार्य इमा दिशो अभि हरन्तु ते बलिम् ॥४॥ | * * * वारि * * भ्रियन्तु * * |
| ॰शौ स्नाक्षेकेनापिबकम् (?) | आक्ष्वैकं मणिम् एकं कृणुष्व स्नाह्येकेन पिबैकम् एषाम् । | आक्षकं * * * इवशीकेन पबीकम् * |

| | | |
|---|---|---|
| | चतु[र्वीरं नै]र्ऋतेभ्यश् चतुर्भ्यो प्राशा बन्धेभ्य× परि पान्त्व् अस्मान् ॥५॥ | |
| | अग्निर् माग्निनावतु प्राणायापानायायुषे वर्चसे । | * मा अग्निनावतु |
| | ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥६॥ | |
| ¹शौ मेन्द्रियेणावतु | इन्द्रो मेन्द्रेणावतु प्राणायापानायायुषे वर्चसे । | * मा इन्द्रणावतु |
| | ओजसे तेजसे स्वस्तये प्रभूतये स्वाहा ॥७॥ | |
| | सोमो मा सौम्येनावतु प्राणायापानायायुषे वर्चसे । | * * मोम्येनावतु |
| | ओजसे तेजसे स्वस्तये प्रभूतये स्वाहा ॥८॥ | |
| | भगो मा भगेनावतु प्राणायापानायायुषे वर्चसे । | |
| | ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥९॥ | |
| | मरुतो मा गणैर् अवन्तु प्राणायापानायायुषे वर्चसे । | |
| | ओजसे तेजसे स्वस्तये सुप्रभूतये स्वाहा ॥१०॥ ॥का° ४॥ ॥अनु° १॥ | [काण्डा- प्रथमानुवाक |
| | | इत्यथर्वेणिकपैप्पलादयश शाखाया पञ्चदश- |

१५ ५

| | | |
|---|---|---|
| शौ २ १३ १ मे ४ १२ ४ का [ ११ ११ | आयुर्दा देव जरसं वृणानो घृतप्रतीको घृतपृष्ठो अग्ने । | घृतपृष्ठो * |
| | घृतं पिबन्न् अमृतं चारु गव्यं पितेव पुत्रं जरसे नयेमम् ॥१॥ | |
| शौ २ २९ २ | आयुर् अस्मै धेहि जातवेद× प्रजां त्वष्टर् अधिनिधेह्य् ओज । | * * नेहि त्वष्टुर् |
| | रायस् पोष सवितर् आ सुवास्मै शतं जीवातु शरदस् तवायम् ॥२॥ | |
| शौ २ २८ ५ | इमम् अग्न आयुषे वर्चसे धा× प्रियं रेतो वरुण मित्र राजन् । | * * * * धा प्रियो |
| | मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर् यथासत् ॥३॥ | |
| आ म २ ४ ४ हि गृ १ ७ ११ | अग्निष् ट आयु× प्रतरां कृणोतु सोमस् ते पुष्टिं प्रतरां दधातु । | * द्र व प्रतिर * |
| आ म इन्द्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैस्ते वसुभिरादधातु, हि गृ इन्द्रो मरुद्भिरिह ते दधात्वादित्यस्ते वसुभिरादधातु | [ ] ॥४॥ | |
| | रेवतीस् त्वा व्य् अक्ष्णन् कृत्तिका[श्] चाकृतस् त्वा । | * * * अक्षण कृत्तिकाश्चकृतम् * [आयुर्वन्तं |
| आ म २ २ ३–५ | अभिशास्त्या व्य् अतन्वत धियो ऽवयन्न् अव ग्ना अयुवन्त ॥५॥ | अभिमस्त्वा अभिशस्त्वा व्यतन्वतु * वयन्नवाग्ना- |
| | सहस्रम् अन्ता अभितो ऽददन्त शिनिर् मध्यम् अभि यन्तु नारी । | * अन्ता * रन्ताशीतिर * अन * * |
| | देवीर् देवाय परिधी सवित्रे महत् तद् आसाम् अभवन् महित्वम् ॥६॥ | * * परिदे अधवन् * |
| आ म २ हि गृ १ ४ १ | इमम् अश्मानम् आ तिष्ठाश्मेव त्वं स्थिरो भव । | |
| | प्र मृणीहि दुरस्यतस् सहस्व पृतनायत ॥७॥ | * * दुरस्यतु |
| शौ १९ २४ १ देवा अधारयन् | येन देव सवितारं परि देवा दिधापयन् ? । | |
| | तेनेमं ब्रह्मणस् पते परि राष्ट्राय धत्तन ॥८॥ | न्त । |
| एव शौ २ | [परीमम् इन्द्रम् आयुषे महे क्षत्राय धत्तन । | |
| ¹शौ यथैन * नयां | [अथैनं जरसे नय ज्योक् क्षत्रे अधि जागरत् ॥९॥] | |
| शौ ३ | परीमं सोमम् आयुषे महे श्रोत्राय धत्तन । | परम धत्तन |
| ²शौ यथैन * नयां | अथैनं जरसे नय ज्योक् श्रोत्रे अधि जागरत् ॥१०॥ ॥का° १॥ | धि * ॥ ९ ॥ |

१५ ६

| | | |
|---|---|---|
| शौ १० २४ ४ आ म २ २ ६ हि [गृ १ ४ २ | परि[धत्त]धत्त वर्चसेमं जरामृत्यु कृणुत दीर्घम् आयु. । | * दत्त वर्नमे इम |
| | बृहस्पति× प्रायच्छद् वास एतत् सोमाय राज्ञे परिधातवा उ ॥१॥ | * प्रायच्छ विवाचे * * परिधातवायु |
| शौ ५ आ म ७ हि गृ | जरां सु गच्छ परि धत्स्व वासो भवा कृष्टीनाम् अभिशस्तिपा उ । | अभिशस्तिवायु, |
| | शतं च जीव शरदस् सुवर्चा रायश् च पोषम् उप त्वा मदेम ॥२॥ | |
| शौ ६ आ म ८ हि गृ १ | परीद् वासो ऽधि धास् स्वस्तये ऽभूर् व् आपीनाम् अभिशस्तिपा उ । | अभिशस्तिवायु |
| | शतं च जीव शरद× पुरूचीर् वसूनि चारुर् वि भजासि जीवन् ॥३॥ | * * जीवरा व्य भजासु * |
| शौ ७ | योगेयोगे तवस्तरं वाजेवाजे हवामहे । | |
| | सखाय इन्द्रम् ऊतये ॥४॥ | |
| शौ ८ | हिरण्यवर्णो अजरस् सुवीरो जरामृत्यु× प्रजया सं विशस्व । | |

तद् अग्निर् आह तद् उ सोम आह बृहस्पतिस् सविता तद् इन्द्रः ॥५॥
यद् ओत सत्य तु मध्याय म आवद् वास× पूर्वायावेतु पुरुरूपं पयस. । * ओत * * * नावद् * पूर्वयावयतु पुरुरूप *
ऽ भद्राचीकास् समजर ? सुधीर तेन ते देवा× प्रतिरन्त आयुः ॥६॥
यस्य ब्राह्मणास् सुजम् ? आरभन्ते स्वर्चन्तो नियमं प्रतिरन्त आयुः । * माह्मणस् * * स्वर्छन्तो
तस्य देवा देवहूतिं जुषन्तां स विश्वा[युस्] स जुषतां स्वस्तिम् ॥७॥ जतां स्वस्ति
यन् नरा धत्स्व परि धत्स्व वास इमम् उस्त्यम् अपुलं पानिजस् ते ।
जरस त्वाम् ऋषयस् स व्ययन्तु सूर्यो भगस् ते प्रतिरन्त आयुः ॥८॥
शौ २ १३ ५ आ म २ ५ १५ हि यस्य ते वा[स×] प्रथमवास्यं हरामि त त्वा विश्वे अवन्तु देवाः । * दे * प्रथमास्यो
[ गृ १ ७ १७ त त्वा भ्रातरस् सुवृधा वर्धमानम् अनु जायन्तां बहवस् सुजातम् ॥९॥ * * * सुविश्रा जायतां * स्वतम् ॥ ३ ॥
आहतनाहतो भव स्थिरस् स्थिरेण सं भव । भवः
प्र मृणीहि दुरस्यतस् सहस्व पृतनायत. ॥१०॥ ॥का° २॥ * मृणीह दुरस्यतु

शौ ५ २४

## १५ ७

मित्र× पृथिव्या अध्यक्ष । * * अध्यक्ष ( एवम् उत्तरत्र)
स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा ॥१॥ आशिषस् *
वरुणो ऽपाम् अध्यक्ष. ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥२॥
वायुर् अन्तरिक्षस्याध्यक्ष ॥
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥३॥
सूर्यो दिवो ऽध्यक्ष । * दिवो *
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥४॥
चन्द्रमा नक्षत्राणाम् अध्यक्ष ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥५॥
वसुस् सवत्सराणाम् अध्यक्षः ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥६॥
सवत्सर ऋतूनाम् अध्यक्ष. । सवत्मर
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥७॥
अग्निर् वनस्पतीनाम् अध्यक्ष ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥८॥
इन्द्र× कर्मणाम् अध्यक्ष ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥९॥
सविता प्रसवानाम् अध्यक्ष. ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥१०॥
॥का° ३॥

शौ ५ २४

## १५ ८

विष्णु× पर्वतानाम् अध्यक्षः । * पर्वतानानामध्यक्ष
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥१॥

त्वष्टा रूपाणाम् अध्यक्षः ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥२॥
रुद्र× पशूनाम् अध्यक्षः ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥३॥
सोम× पयसाम् अध्यक्षः ।
[ स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्या
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥४॥
समुद्रो नदीनाम् अध्यक्ष. ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥५॥
पर्जन्य ओषधीनाम् अध्यक्ष. ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥६॥
हिंकारस् साम्नाम् अध्यक्षः ।
स मा[वत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्या पुरोधायाम अस्या   * मा ॥
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥७॥
सरस्वती वाचाम् अध्यक्षा ।   अध्यक्ष
सा मा[वत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां   म मा
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥८॥
पूषा पत्नीनाम् अध्यक्षः ।
स मा[वत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां   म मा ॥ म मा ॥
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥९॥ ॥का॰४॥

## १५ ९

बृहस्पतिर् देवानाम् अध्यक्ष. ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्या पुरोधायाम् अस्या
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥१॥
प्रजापति× प्रजानाम् अध्यक्ष. ।
[स मावत्व् अस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम अस्या
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥२॥
शौ ५ २४ १४   यम× पितृणाम् अध्यक्षः ।
स मावत्व् अस्मिन् [ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां पुरोधायाम् अस्यां
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा] ॥३॥
शौ १५,१६,१७   पितर× पर ऽवरास् ततास् ततामहाः ।   * * वरस्ततस्ततामहस
ते मावन्त्व् आस्मिन् ब्रह्मण्य् अस्मिन् कर्मण्य् अस्यां [ पुरोधायाम् अस्यां ]
देवहूत्याम् अस्याम् आकूत्याम् अस्याम् आशिषि स्वाहा ॥४॥   आशिषम *
का १८ १२ पराक्रमध्व   देवानां देवा देवा देवा देवेष्व् अधिदेवा× प्र क्रमध्व प्रथमा द्वितीयेषु   * * * ॰व * * प्र (उपरि परा)
द्वितीयास् तृतीयेषु ॥५॥
का   त्रिर् एकादशा विश्वे वैश्वानरा महि शान्ताव् अनु व आ रभध्वम् ।   मा नो * * * *
इद शकेय यद् इद कृणोमि स्वाहा ॥६॥ ॥का॰५॥ ॥अनु॰२॥

इत्यथर्वणिकपैप्पलादय शाखायां पञ्चदश-
काण्डे द्वितीया नुवाक ॥

## १५.१०

ऋ ६ ७५ १-१०

जीमूतस्येव भवति प्रतीक यद् वर्मी याति समदाम् उपस्थे ।   * * * य्यद्वर्मी * सुमना *
अनाविद्धया तन्वा जय त्व स त्वा वर्मणो महिमा पिपर्तु ॥१॥
धन्वना गा धन्वनाजि जयेम धन्वना तीव्रास् समदो जयेम ।   ध वनाजि * ममधो *
धनुश् शत्रोर् अपकाम कृणोतु धन्वना सर्वा× प्रदिशो जयेम ॥२॥
वक्ष्यन्तीवेद् आ गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।   प्रिय * ॰जानां
योषेव शिङ्क्ते वितताधि धन्वन् ज्या इय समिति पार[य]न्ती ॥३॥   इय समिति *

| | | |
|---|---|---|
| | ते आचरन्ती समनेव योषा मातेव पुत्र पिपृताम् उपस्थे । | ती |
| | अप शत्रून् विध्यतां संविदाने आर्त्नी इमे विस्फुरन्ती अमित्रान् ॥४॥ | * शतून् विधता * आत्नी |
| | बह्वीना पिता बहुर् अस्य पुत्रो ष्यू आ च कृणोति समदो अवगत्य । | कृणोतु ममिथो वगत्या |
| | इषुधिस् सङ्का× पृतनाश् च सर्वा× पृष्ठे निनद्धो जयति प्रसूत. ॥५॥ | * सकः |
| | रथ तिष्ठन् नयति वाजिन× पुरो यत्रयत्र कामयते सुषारथि. । | सुमारथि· |
| | अभीशूनां महिमान पनायत मन× पश्चाद् अनु यच्छन्ति रश्मयः ॥६॥ | अभशूनां |
| | तीव्रान घोषान् कृण्वत वृषपाणयो ऽश्वा रथेभिस् सह वाजयन्त. । | * * कृणुते |
| | [ अवक्रामन्त× ] प्रपदैर् अमित्रान् क्षिणन्ति शत्रू अ[न]पव्ययन्त. ॥७॥ | प्रमृणीनमिक्षात् * शतृ * |
| | रथवाहन हविर् अस्य नाम यत्रायुध निहित[म् अ]स्य वर्म । | निहत * * |
| | तत्रा रथम् उप शग्म सदेम विश्वाहा वय सुमनस्यमाना ॥८॥ | विश्वाफा (उपरि हा) * * |
| | स्वादुषंसद× पितरो वयोधा× कृच्छ्रेश्रितश् शक्तीवन्तो गभीरा. । | कृच्छेश्रृजश्र * * |
| | चित्रसेना इषुबला अमृध्रास् सतोवीरा उरवो व्रातसाहा ॥९॥ | * * अमृध्रास |
| | ब्राह्मणास× पितरस् सोम्यासश् शिवे नो द्यावापृथिवी अनेहसा । | ब्रह्मणामः न * * |
| | पूषा न× पातु दुरिताद् ऋतावृधो रक्षा माकिर् नो अघशस ईशत ॥१०॥ | माकिर् णो * * |
| | ॥ का° १ ॥ | |
| | **१५ ११** | |
| ऋ १० ४२ ११ शौ ७ ५१ १ | बृहस्पतिर् न× परि पातु पश्चाद् उतोत्तरस्माद् अधराद् अघायो· । | |
| | इन्द्र× पुरस्ताद् उत मध्यतो नस् सखा सखिभ्यो वरिव× कृणोतु ॥१॥ | |
| ऋ ६ ७५ ११ | सुपर्णं वस्ते मृगो अस्या दन्तो गोभिस् सनद्धा पतति प्रसूता । | * * * अस्यामि * * सन्नद्धामि पचति * |
| | यत्रा नरस् स च वि च द्रवन्ति तत्रास्मभ्यम् इषवश् शर्म यच्छान् ॥२॥ | ऋषयश * * |
| | सुपर्णो वासो अधि सर्पिर् आस मनो हिरण्यम् इषव× पतत्री । | . आमा पतत्री |
| | मास्मात् सरन्न् अमृता× पतन्तीर् उत प्रहितास् सवितुर् जयन्तु ॥३॥ | * * असुना पतन्ती * प्रहीनाम * * |
| ऋ १४ | अहिर् इव भोगै× पर्य् एति बाहु ज्याया हेतिम् अपबाधमान. । | |
| | हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि पातु मृत्यो ॥४॥ | मृत्यु |
| ऋ १३ | आ जङ्घन्ति सान्व् एषा जघनां उप जिघ्नते । | |
| | अश्वाजनि प्रचेतसोऽश्वान् समत्सु चोदय ॥५॥ | |
| ऋ ६ ४७ २७ | दिव× पृथिव्या× पर्य् ओज आभृत वनस्पतिभ्य× परि सभृतं स[ह] । | |
| | अपाम् ओज्मान परि गोभिर् आभृतम् इन्द्रस्य वज्र हविषा रथ यज ॥६॥ | *ओज्मन |
| ऋ २८ | इन्द्रस्य वज्रो मरुताम् अनीक मित्रस्य गर्भो वरुणस्य नाभि. । | वरुणस्य * |
| | स इमा नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥७॥ | * इमा |
| ऋ २६ | वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणस् सुवीर । | |
| | गोभिस् सनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥८॥ | वीडा° |
| ऋ २९ | उप श्वासय पृथिवीम् उत द्यां पुरुत्रा ते मनुतां विष्ठित जगत् । | * * * * * * तेन मुनुता विष्ठिता * |
| ऋ ३० | स दुन्दुभे [ सजूर् इन्द्रेण देवैर् दूराद् दवीयो अप सेध शत्रून् ॥९॥ | |
| ऋ ३१ | [ आ क्रन्दय बलम् ओजो न आ धा निष्टनिहि दुरिता बाधमान. । | |
| | [ अप प्रोथ दुन्दुभे ] दुच्छुना इत इन्द्रस्य मुष्टिर् असि वीडयस्व ॥१०॥ | |
| | ॥ का° २ ॥ | |
| | **१५ १२** | |
| शौ ६ १२६ ६ । ऋ ६ ४७ [३१ | प्रामू जयाभीमे जयन्तु केतुमद् दुन्दुभिर् वावदीतु । | प्रामु |
| | सम् अश्वपर्णा× पतन्तु नो नरो ऽस्माकम् इन्द्र रथिनो जयन्तु ॥१॥ | स न सुपर्णः पतयन्ति |
| ऋ ५ ३१ १ | इन्द्रो रथाय प्रवत कृणोतु यम् अध्यस्थान् मघवा [वा]जयन्तम् । | * * प्रमिद * * अध्यस्था |
| | अहेर् इव पशून् त्रायते गोपा अरिष्टो यातु प्रथमस् सिषासन् ॥२॥ | अहिर् * * त्रियैतु शिशाम |
| | ८ पर्जन्यस्येव स्तनयित्नुर् आसीर् इन्द्राग्न्योर् इव छिद्यते घोषो ऽस्य । | * * * * इव ते छिद्यते * * |
| | ८ सहस्रवीरश् शत सिसुम्वा नेत सिसुम्वा रथ मृडय ? ॥३॥ | सहस्रोवीरश् रथ * |
| ऋ १ ११६ ३ । शौ ० ४ ८ | श्येनस्य पक्षा हरिणस्य बाहू अश्विनोर् असौ मरुताम् अनीकम् । | बहू अ अश्विनोर् |
| पै १५ ११ ८ | गोभिस् सनद्धो असि वीडयस्व[ास्थाता ते जयतु जेत्वानि] ॥४॥ | |
| ऋ १ ९५ ७ | उद् ययमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन् । | * यम्रसीनि * ववाहू ॥४॥ * मतौ * * रुज |
| | उच्छु शुक्रम् अत्कम् अजत शचीभिर् नवा मातृभ्यो वसना जहाति ॥५॥ | * * अरथम् अयती शचीभिन्नवा * * * |
| | ८ उग्रौ ते नमी पवी त उग्रास् सकपो बृहतो रथस्य । | रथस्य |

ꣳ ये शात्रवेणो नवतहुद् अप्राप्निश् चक्षु× प्रवेण रथस्य ? ।
तेनामित्रान् प्रमृणन् याहि शत्रून् ॥६॥ शत्रून्
ꣳ रानाभयो बलमित्येक्ष उम्र त घोषौ सह नः स्वराभ्याम् ।
ꣳ आरण्यो वर्माणि च घोयो राजान वंत उत बन्धुरे ते ? ॥७॥
ꣳ गोष्ठ वालिं मृग एकसङ्गं प्राक्रमध्व महा सुव च ।
ꣳ अभीशवो हतानेन वृत्रम् अयं क्षत्रेण प्रजयास्तूप्रा ? ॥८॥
आ तिष्ठ जिष्णुस् तरसा सहस्वी सहस्रवीर प्रमृणन् याहि शत्रून् । शत्रून्
त्रिष्ठे योग कृणुत वीर्याणि उद् एताम् एतं रथम् अस्य शग्मे ॥९॥ त्रिष्ठे
अष्टौ चक्षूंषि कवयस् सं नमन्ति ꣳ दवा प्राग् आश्वा रथ शावयन्त ।
ꣳ अनु प्रस्कम्भो दधर्ती पितेव चक्रमाणमै धत्स्वोपस्थे प्रतिरात्य् आयुः ॥१०॥
ꣳ कविभिस् सुथस् सरथ विवक्षस् स्वय धनुर्धनर् धनुस्थे दधान ।
ꣳ अनुप्रास्येषान् प्रतितिबुद्ध्यमान इषेभ्यः सताय ? कविभि× कृतानि ।
तेभिष् टे शर्म यच्छन्तु देवा· ॥११॥ ॥का॰ ३॥

## १५ १३

शौ ११ ६ १ अग्निं ब्रूमो वनस्पतीन् ओषधीर् उत वीरुधः । ओषधीनत् *
इन्द्र बृहस्पतिं सूर्यं ते नो मुञ्चन्त्व् अंहस ॥१॥ ॥ २ ॥
शौ २ ब्रूमो राजान वरुणं [ मित्र ] विष्णुम् अथो भगम् ।
अंश विवस्वन्तं ब्रूमस् ते [ नो मुञ्चन्त्व् अंहस· ] ॥२॥ ॥ ३ ॥
शौ ४ गन्धर्वाप्सरसो ब्रूमो अश्विना ब्रह्मणस् पतिम् ।
अर्यमा नाम यो देवस् ते [ नो मुञ्चन्त्व् अंहस ] ॥३॥ ॥ ४ ॥
शौ ६ वातं ब्रूम× पर्जन्य[म्] अन्तरिक्षम् अथो दिश ।
आशाश् च सर्वा ब्रूमस् ते [ नो मुञ्चन्त्व् अंहस. ] ॥४॥ * * सर्व ॥ ५ ॥
शौ ५ अहोरात्रे इद ब्रूमस् सूर्याचन्द्रमसा उभा ।
आदित्यान् सर्वान् ब्रूमस् ते नो मुञ्चन्त्व् अंहस· ॥५॥ ॥ ६ ॥
शौ ७ मुञ्चन्तु मा शपथ्याद् अहोरात्रे अथो उषा· । वृषा
सोमो मादित्यो मुञ्चतु यम् आहुश् चन्द्रमा इति ॥६॥ ॥ ७ ॥
शौ १५ पञ्च राज्यानि वीरुधां सोमश्रेष्ठानि ब्रूमसि । * राज्यान् वीरुधान् सोमश्रेष्ठानि *
भङ्गो दर्भो यवस् सहस् ते नो मुञ्चन्त्व् अंहस· ॥७॥ * * यक्ष्म ॥ ८ ॥
शौ ८ ये ग्राम्यास् सप्त पशव आरण्या उत य मृगा ।
शकुन्तान् पक्षिणो ब्रूमस् ते [ नो मुञ्चन्त्व् अंहस· ] ॥८॥ ॥ ९ ॥
शौ ९ भवाशर्वा इद ब्रूम उग्र× पशुपतिश् च य· । * * ब्रमा
इषूर् या एषां विद्मस् ते नो [मु]ञ्चन्त्व् अंहसः ॥९॥ ॥का॰ ४॥ * * एषा ॥ १० ॥

## १५ १४

शौ ११ ६ १४ यज्ञ ब्रूमो यजमानम् ऋचस् सामानि भेषजा । ऋचाम् * *
यजूंषि होत्रा ब्रूमस् ते [ नो मुञ्चन्त्व् अंहस· ] ॥१॥ * होत्रा
शौ १७ ऋतून् ब्रूम ऋतुपतीन् आर्तवान् उत हायनान् । * * ऋतुपतीन् आर्तवान् * हायिनम
समास् संवत्सरान् मासांस् ते [ नो मुञ्चन्त्व् अंहस ] ॥२॥ समान् * मासहम्
शौ १० दिवं ब्रूमो नक्षत्राणि भौम यक्षाणि पर्वतान् । पार्वतान्
समुद्रा नद्यो वेशन्तास् ते [ नो मुञ्चन्त्व् अंहस· ] ॥३॥
शौ ११ सप्त ऋषीन् वा इद ब्रूमो ऽपो देवी× प्रजापतिम् । देवी *
पितॄन् यमश्रेष्ठान् ब्रूमस् ते [ नो मुञ्चन्त्व् अंहस· ] ॥४॥ * यम श्रेष्ठानि
शौ १९ विश्वान् देवान् इद ब्रूमस् सत्यसन्धान् ऋतावृध· ।
विश्वाभि× पत्नीभिस् साक ते नो मुञ्चन्त्व् अंहस· ॥५॥
शौ १३ । ꣳशौ दिवि देवा आदित्या रुद्रा वसवो देवा दैवा अथर्वाण· ।
अङ्गिरसो मनीषिणस् ते [ नो मुञ्चन्त्व् अंहसः ] ॥६॥

शौ १२ ये देवा दिविषदो अन्तरिक्षसदश् च ये ।
पृथिव्यां शक्रा [ये] श्रितास् ते [ नो मुञ्चन्त्व् अंहस. ] ॥७॥ * चक्रा शृजम्
शौ १८ एत देवा दक्षिणतः पश्चात् प्राञ्च उदेत नः । ये उदेतु *
पुरश् शक्रा उत्तराद् विश्वे देवास् समेत्य ते [ नो मुञ्चन्त्व् अंहसः ] ॥८॥ * चक्रा * * देवा दक्षिणतः पश्चात् प्राञ्च उदेतु न.
शौ १६ अरायान् ब्रूमो रक्षांसि सर्पान् पुण्यजनान् उत । राया [पुरश्चक्रा उत्तराद्विश्वे देवास्समेतु ते
मृत्यून् एकशतं ब्रूमस् ते नो मुञ्चन्त्व् अंहस. ॥९॥
शौ २२ या देवीः पञ्च प्रदिशो ये देवा द्वादश ऋतवः । * * * प्रदिश तुष.
संवत्सरस्य ते दंष्ट्रास् ते नस् सन्तु सदा शिवाः ॥१०॥
शौ २१ भूतं ब्रूमो भूतपतिं भूतानाम् उत यस् पतिः ।
भूतानि सर्वा ब्रूमस् ते नो मुञ्चन्त्व् अंहस. ॥११॥ ॥का°५॥ ॥अनु°३॥

॥ ॥ इति तृतीयो नुवाक पञ्चदश ॥ ॥

## १५ १५

यावद् द्यौर् यावत् पृथिवी यावत् पर्येति सूर्य । योवद् यवात् * *
तावत् त्वम् उग्र ओषधे परि पाह्य् अरुन्धति ॥१॥ उग्रोषधी . अरुन्धती
अग्निष्टस् त्वाग्ननत् परिष्ठाय खनामि त्वा ।
ऋ १० ९७ २०[४] द्विपाच् चतुष्पाद् अस्माकं सर्वम् अस्त्व् अनातुरम् ॥२॥ अत्व् अनापुर
[१]पै ६ ४ १[४] [सा] देवानाम् असि स्वसा म् × × × सि सिञ्चनी । तवानाम् .
ऋ १७[४] य जीवम् अश्नुषे त्वं न स रिष्यात् पूरुष ॥३॥ पौरुष.
अरुन्धती नामासि तृतीयस्याम् उतो दिवि । इतो *
तत्रामृतस्य रोहण तेन त्वाच्छा वदामसि ॥४॥
श त आपो या दुन्व्याश् श ते कूलजा या उत । रुन्धापो दथाइश्न्दे कूलज्या उत
शौ ७ ६० ११ श वातश् शं बृहस्पतिश् श ते तपतु सूर्य. ॥५॥
[४]शौ १४ श त इन्द्राग्नी भवतां श रात्री प्रति धीयताम् । प्रति *
श ते पृथिव्या वीरुधस् सह वस् सन्त्व् ओषधीः ॥६॥
वशीकृतां त्वाम् अविधम् ओषधे वीर्यावती । वशीकृत्वामविषमोषधि *
[४]पै ५ १३ २[४] अरुन्धति त्वाम् अहार्षम् इतो मा पारयान् इति ॥७॥ * * अहार्षम्
८ अभिप्रेप्सी उपजीवन्ति ? मगधश् चेद् अरुन्धती ।
एषा च विश्वभेषजी देवी वातीकृतस्य न ॥८॥ वातीकृतस्य न
८ अनिषिञ्चनश् च क्रुध्य् ? अगदो वै भविष्यसि ।
[१]शौ ६ १०० ३[१] वातीकृतस्य भेषज्य् आगन् देव्य् अरुन्धती ॥९॥ ॥का°१॥ * * आग ॥१०॥

## १५ १६

अरुन्धत्यस् स वदन्ते गावः प्रव्राजिनीर् इव । * य * प्रावा.
इम त्वरम् अव गच्छामावधि ? कृणु मार्ति ? ॥१॥ इमा * इव
इम मे त्व जरामृत्युं पुरुष कृण्व् ओषधे । जरा मृत्य * कृण्वोधे
राज्ञी सर्वासाम् अस्य् ओषधीनाम् अरुन्धति ॥२॥ ॰ती
त्रायमाणा च असि जीवला वीर्यावती ।
अरुन्धति त्व तस्यासि विषस्य विषदूषणी ॥३॥
आदिग्धेन च विद्धस्याघस्याघविषा च या । अरिग्धेन ॰विष * *
अरुन्धति त्व तस्यासि विषस्य विषदूषणी ॥४॥
अहिना च दष्टस्याघस्य[ाघविषा च या । आहेन
[ अरुन्धति त्व तस्यासि विषस्य विषदूषणी] ॥५॥
वातीकारेण च क्षिप्तस्य[ाघस्याघविषा च या । वाचीकारेण * क्षुप्तस्य
[ अरुन्धति त्व तस्यासि विषस्य विषदूषणी ] ॥६॥
भवेन च [ क्षिप्तस्याघस्याघविषा च या ।
[ अरुन्धति त्व तस्यासि विषस्य विषदूषणी ] ॥७॥
शर्वेण च [ क्षिप्तस्याघस्याघविषा च या ।
[ अरुन्धति त्व तस्यासि विषस्य विषदूषणी ] ॥८॥

| | | |
|---|---|---|
| | पशुपतिना च क्षिप्तस्य[ाघस्याघविषा च या । | * * क्षुप्तस्य ॥१०॥ |
| | [ अरुन्धति त्वं तस्यासि विषस्य विषदूषणी ] ॥९॥ ॥ का॰ २ ॥ | |
| | **१५.१७** | |
| | उग्रेण च देवेन क्षिप्तस्य[ाघस्याघविषा च या । | * * * च क्षुप्तस्य |
| | [ अरुन्धति त्वं तस्यासि विषस्य विषदूषणी ] ॥१॥ | |
| | महादेवेन च क्षिप्तस्य[ाघस्याघविषा च या । | क्षुप्तस्य |
| | [ अरुन्धति त्व तस्यासि विषस्य विषदूषणी ] ॥२॥ | |
| | ईशानेन च क्षिप्तस्याघस्याघविषा च या । | क्षुप्त॰ हविषा * * |
| | [ अरुन्धति त्व तस्यासि विषस्य विषदूषणी ] ॥३॥ | |
| | यत् पृथिव्यां विष वीरुत्सु यद् विषम् । | वीरत्सुर * * ॥ ३ ॥ |
| | [ अरुन्धति त्व तस्यासि विषस्य विषदूषणी ] ॥४॥ | |
| | यद् ओषधीभ्यस् संभरन्ति ब्रह्मणो मेनये विषम् । | ब्राह्मणो * * |
| | [ अरुन्धति त्व तस्यासि विषस्य विषदूषणी ] ॥५॥ | |
| | यद् ब्रह्मणा सभरन्ति तृष्टम् आसीद् विषविषम् । | * ब्रह्मणास * तिष्ठम् ॥ ४ ॥ |
| | [ अरुन्धति त्व तस्यासि विषस्य विषदूषणी ] ॥६॥ | |
| | सक्षिप्तो मृत्युना य× प× यो तृष्टस् तृष्टदंश्माभि । | मक्षुप्तो ओ तृष्टस्यष्ठदंश्मभि |
| | अरुन्धति त्वं तस्यासि विषस्य विषदूषणी ॥७॥ | ॥ ५ ॥ |
| | ¿ संजीष्मा मुक्त्वा यष्मादाष्र्यो ? लोकम् उत्तमम् । | * * य(उपरि यु)ष्मा॰ |
| "शौ ५ ३० ६" | ¿ अपावकीय स्वा ? पात्रेणाधि जीवपुरा इहि ॥८॥ ॥ का॰ ३ ॥ | हि ॥ ६ ॥ |
| | **१५ १८** | |
| | ¿ अप्सरसो दिवोदिवो हि क्षत्रिवो हि ? भिनद्मि मेहनम् । | |
| | ¿ व्यू अतडाल व्यू अर्जुनम् उप ? वृत्र भिनद्मि यः ॥१॥ | भिनद्दि व |
| | विश्वजन्या× पञ्च[ज]न्या महारुक्माथ शिखण्डिनी । | * * रुक्मा शिखण्डिनी |
| | सर्वा इन्द्रस्य वज्रेणाहता बुद्बुदया तव ॥२॥ | |
| | ¿ अन्धाचीम् असिताचीम् ? उलूखलस्य मुष्मेन । | * * उलू * |
| | अहित वत्सप जहि ॥३॥ | |
| | दूराद् एना× प्रापश्यम् आपततीर् अथो दिव । | * * प्रपश्यम् आपतन्तीर् |
| | देवानां हव्यमोहनीर् इन्द्रो ऽप्सरसो हनत् ॥४॥ | देवाना ॰माहनीम् |
| | आहता आपतयन्ति खलाद् इव यातुधान्य । | अहतापतायति |
| | ¿ इमं गच्छत. ? ॥५॥ | |
| | दिव गच्छन्तु दिव्यास् सरो गच्छन्तु सारसी । | सारमी |
| | ¿ उलं आलस्य यो गुलस् तद् अगच्छन्त्य् आसुरे ? ॥६॥ | |
| "पै १५ १८ ९" | ¿ ये स्कन्दीके ये ऽस्कन्दीके पराचैर् उपनृत्यथ. । | य * व * पराचीरपनृत्यमश |
| "७४ पै ९" | ¿ [ शृणामि घोरा व× पृष्टीथ् ] शार्ङ्गेण शुना सह ? ॥७॥ | |
| | यच् छार्ङ्ग हिरण्यद यश् च दिव्य× परिप्लुवः । | यश शाङ्ग * अहवा * * |
| | तस्याह नाम जम्रभास्मा अरिष्टतातये ॥८॥ | * * जम्रभा असमा * |
| | ¿ कङ्कन वीर्ण पराचैर् उपनृत्यथ. । | अपनृत्यतश |
| | शृणामि घोरा व× पृष्टीर् ब्रह्मणा कीकसा उत ॥९॥ | व पृष्टी |
| | ¿ एकत्य सदग्ववती चतस्र उदकगुव. । | |
| | शिवा दश सुता दश केशिनी× पञ्चविंशती ॥१०॥ ॥ का॰ ४ ॥ | |
| | **१५ १९** | |
| | इदम् उलुंगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नमः । | यदिम् |
| "पै ७ १३ ४" | या× प्रेङ्खे प्रेङ्खयन्त साम्स्वनेन माल्व्यया वा ॥१॥ | * प्रयखे प्रयखयन्ते सस्वानेन माल्वायव |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकरं नमः । ] | |

| | | |
|---|---|---|
| पै २ | या× पुरस्ताद् आचरन्ति साकं सूर्यस्य रश्मिभि॰ ॥२॥ | * * आचरन्त्यार * * * |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नम॰ । ] | |
| | या [अ]धराद् आचरन्त्य् अरसास् सरसास् सह ॥३॥ | * * * अरसात् सहषा * |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नम । ] | |
| | या× पश्चाद् आचरन्त्य् अन्धेन तमसा सह ॥४॥ | |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकरं नम॰ । ] | |
| | या उत्तराद् आचरन्ति वर्षेण विद्युता सह ॥५॥ | विद्युतास * |
| | [ इदम् उलुंगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नम । ] | |
| पै ६ | या अधस्ताद् उदीक्षन्ते सचक्षुष× कनिक्रती ॥६॥ | साचक्षु कनिक्रती |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नम॰ । ] | |
| | या उपरिष्टाद् अवेक्षन्त नीलव्यक्तानि बिभ्रती ॥७॥ | * * अवीक्ष्यन्ते * बिभ्रती |
| | [ इदम् उलृगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नम । ] | |
| | या अन्तरिक्ष रायन्ति वातेन रंह्मणा सह ॥८॥ | * * रयन्ति |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकरं नम । ] | |
| पै १० | या नदी× [प्रतिगाहन्ते स्वरभ्य कन्यया वय॰ ॥९॥ | |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नम । | |
| पै ११ | [ यास् तीर्थम् अवगाहन्ते ऽप्स्याशु इवसनीर् इव ॥१०॥ | या नदीरिति चतस्र ॥७॥ |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नम । | इदमुलुंगुलुकोत्तरा ॥८॥ काण्ड॰ ५॥ |
| पै १२ | [ यास् समुद्राद् उच्चरन्त्य् उच्चैर् घोषान् करिक्रती ॥११॥ | ॥ इति चतुर्थो नुवाक पञ्चदश ॥ |
| | [ इदम् उलुगुलुकाभ्यो ? ऽप्सराभ्यो ऽकर नम॰ । | |
| पै १३ | [ या गच्छन्ति जनजनम् इच्छन्ती× प्रहित बहु] ॥१२॥ ॥का॰५॥ ॥अनु ४॥ | |

## १५ २०

| | | |
|---|---|---|
| ऋ २ ३३ २ | त्वज्जातेभी रुद्र शन्तमेभिश् शत हिमा भुजीय भेषजेभि॰ । | त्वज्जाता * शन्तमा नो हि नो बभूज्या * |
| | वि यक्ष्मान् यावयास्मद् व्य् अंहो व्य् अमीवाश् चातयास्मद् विषूची ॥१॥ | वीक्ष्मान् * * ओहो मेवश् * विषूची |
| ऋ ३¹ ' | त्व देवानाम् असि रुद्र श्रेष्ठस् तवस्तमस् तवसाम् उग्रबाहो । | रुद्रश * तपस्तवस् |
| | हरिणी या सा मनसा मोदमाना बभूविथ रुद्रस्य सूनो ॥२॥ | * य बभूयथ्यथ * * |
| १ऋ ४³ | त्व हि नो वीरां ईरय भेषजभिर् उरु नो वाम मघवो मरुत्वन् । | * * * वीरीं ईरे * * * वन * मरुत्व |
| ऋ ३²ˣ | कचा ? न× पातुम् अहसस् स्वस्ति विश्वा अभीतीर् अप सेधास्मत् ॥३॥ | अहस * विश्वाभीतीर् * * |
| १ऋ ७ˣ | त्व हि नो वृषभ चक्षमीथा असौ रुद्रायोग्राय मीढुषे । | चक्षसेष्ठा वृसेम * * |
| | क्षीरक्षीराय प्र भरामहे मतिं यथा नश् शम् असो द्विपदे शं चतुष्पदे ॥४॥ | |
| पव ऋ ७' ³ | क स्य ते रुद्र मृडयाकुर् हस्तो [यो अस्ति भेषजो] जलाष । | * ने तु * हस्तो मृडायाको * |
| | अपभर्ता रपसो दैव्यस्य ॥५॥ | अपि॰ |
| | परि निर्दाधिंर त्व अस्मच् छयेनी वसिष्ठा पृतदान् ? अमीवा । | अस्मत् स्येने |
| | आ रा च्व सं मा प्र त ना जं ता ? ॥६॥ | |
| ऋ १०¹¹ | अर्हन् धनुर् हरित बिभर्ष्य अर्हन् निष्क रजतं विश्वरूपम् । | अह * * * अह |
| ऋ १०¹ [भूयिष्ठ सर्वान् | अर्हन्न् इद दयस विश्वम् पजत् । | अर्ह निधते विश्वमेजम् |
| शौ ११ २ २५¹ˣ । शौ काशेषु | न त दूर न परिष्ठास्ति ते भव सद्यस् सर्वा परि पश्यसि भूमिम् ॥७॥ | * * * नु परिष्ठारिथ सर्वान् * पश्यामि * |
| शौ १ १३ १ ऋ खि ४ ४ १ | नमस् ते अस्तु विद्युते नमस् ते स्तनयित्नवे । | * * स्तु स्तनयित्नुवे |
| | नमस् ते अस्त्व् अश्मने येना ₆ दूरात् प्रत्यस्यसि ? ॥८॥ | * * स्त्व् प्रादिजस्मसि |
| | मा देवानाम् उग्र राजन्न् अस्माक पुरुषा रिषन् । | राजम् * * रिष |
| | रक्षास्व अस्मद् रक्षासि नाशयामसि ब्रह्मणा ॥९॥ | रक्षामि यस्माद् |
| | ब्रह्मणतो नाशयामो यो दिवि ? चाक्षेष्व् आरुहत् । | |
| | शल्यान् यक्ष्मस्याथो गोपीस् ता इतो वि नयामसि ॥१०॥ ॥ का॰ १ ॥ | शल्या यक्ष्मस्यातो * त |

## १५ २१

| | | |
|---|---|---|
| | नयामि वां पशुपती घृतेनाज्येन वर्धयन् । | * त्वां |
| | या द्विष्मो यश् च नो द्वेष्टि तस्य द्वेष× करिष्यथः ॥१॥ | वेष× करिष्यता |

अधि भूतं पशुपती द्विपदे मे चतुष्पदे ।
प्रसूतौ यत्र जघ्नतस् ततो मेमापरं ? वृषा ॥२॥          प्रसूतो * जघ्नतस्
या वां रुद्रा शिवा तनूर् या वाम् अस्त्य् अरोगिणी ।          * * रुद्रास् वां मन्त्य *
या वाम् आयुष्मती तनूस् ताभिर् नो मृ[ड]त युवाम् ॥३॥          युव
न प्र मृडन्ति वाजिनो व्रतानि सत्यं जिन्वन्त. ।          * * मृडान्ति वजिनो जन्वन्तो
अधि विदथ वदन्तः ॥४॥          दि विदथा *
यस्येमे रोदसी उभ सयुक्ते मनसा हृदा ।          यास्येमे रुदर्मी
स प्रजानां प्रजापतिस् साधु वर्षति वर्षति ॥५॥          * * °पति
स वेद रक्ष भेषजं देवेभ्यस् पर्याभृतम् ।
तेन नो मृडत युवां जीवातवे न मर्तवे अथो अरिष्टतातये ॥६॥          * * मृडात युवम् ॥६॥
सगुणा सासते सयुक्ता वलाय कम् ।          वलाय *
तेषां यद् इन्द्रिय बृहच् चित्त रुचित रोचनम् ॥७॥          वृह [ ] न रोचित रोचना ॥७॥
एते रोचने बृहती अन्तरिक्षे अथो दिव ।
ताभ्याम् अप्रह्विमस् ? सर्ववीरा न रिष्यन्ति ॥८॥          मवर्वीरा अरिष्यन ॥८॥
सर्ववीरा न रिष्यन्तो रोचने अधि तस्थिमा ।          सर्ववीरा अरिष्य तो रो [ ]नो * *
यथा न× पुनवद् वसु दिव× क्षुभ्यो ऽप्सु सूर्य ॥९॥ ॥अ° २॥          * नरिश्च पु रवद्

१५ २२

इन्द्राग्नी हुवे प्रथमो ह्वयामि मरुतश् शिवान् ।          मारुत शिवा
ह्वयामि विश्वा[न्] देवान् इम होमम् अवन्तु मे ॥१॥          * * * इमो
त्व प्रथमो ऽमृतत्वम् अग्ने देवो देवत्व प्रथमो जिगथ ।          * * * अग्न जिगथ
तव दिवि हृदय स बभूव स नश् शिवापो जातवेदो नि यच्छ ॥२॥          * * * * * मनश् * * * *
पै १३ ९ १ अग्नाव् अग्निश् [ चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एष ।          } अग्नावग्निरि ये।।
[ तस्मै जुहोमि हविषा घृतेन मा देवाना योयुवद् भागधयम् ] ॥३॥
ये देवा दिविष्ठा ये पृथिव्यां जातवेदो य उराव् अन्तरिक्षे ।          उराव अनरिक्ष
ये गिरिषु पर्वतेष्व् अप्स्व् अन्तस् ते देवा अशनिं यावयान् इत ॥४॥          यद देवाशने यावयाद *
मित्र दिग्भि× कृणुष्व जातवेद आशाभिर् मित्रम् अधिपा वि पश्य. ।          * [ ]रभ्य- * जातवंद पश्यत्
मा नो हिंसीर् दिव्यनाम्निना सत्येन यन्तु मरुतस् स्पर्धमाना ॥५॥          * * हिंसी मरुत स्पर्धमाना
विद्योतमानस् स्तनयन् वृषेवेषि कनिक्रदत् ।          विद्योतमान
भीम× पर्जन्य त रथस् स [ वर्चो ] नश् च यच्छतु ॥६॥          * * * रथश्नो नश्चा *
ये विद्युतम् अशनिम् आतन्वन्ति मरुतस् सलिलाद् अधि ।          यो विद्युतम
कृषिं नो विश्ववारा यावद् अन्या नितन्वताम् ॥७॥          अन्वा *
ये विद्युतम् अशनिं पातयन्त्य् अन्तरिक्षाद् उत वातान् दिवश् च ।          * * अशन वाता * *
तेभ्यो गृध्रेभ्यो नमो ऽस्त्व् ओजसे ॥८॥          * गृध्र्यो
ता यन्ति स्वरकृतास् स्योनाश् शिवतमा× पथा ।          * * स्वरकृता
मा न इन्द्र इम वधीन् मित्रम् एनेन कृण्महे ॥९॥          मा ना * * थथा
दर्भ उग्र ओषधीना श[त]काण्डो अजायत ।          दभग्र
स देवै× प्रहितो ऽयम् आगन् स्वस्तये वृषा मृग्भिस् सह सविदान ॥१०॥          आग मह सविधान
॥का° ३॥

१५ २३

वृषाण्यस्यासुरस्य मेनिर् असि तान्वा ? तथा वेद कतमस्य ।
‹ कोविदस्यो वमावात् तांनाभ्यम कान द्वादशाह्नानि वृक्षये ? ॥१॥
असृक् मे तिग्मस्याहतम् इन्द्राग्निभ्यां सुशासत. ।
तेन मे दामयु ? ददाति कृषिं मे मा वधीर् इति सस्यं मे मा वधीर् इति ॥२॥          ददाति कृपिन * * वधीर * शस्यन् *
‹ मरत× प्र वृष्णो ? दिव× क्षुद्रेभी रश्मिभि. ।          शुक्रेभि * [ * वधीर *
उदुम्बरस्य शाखया चक्षुषाशनिं यावयान इतः ॥३॥          * * °शन यावयाद् *
¹ऋ १ २१ १२¹ मरुतो मृडयन्ति नो दिवश् शुक्रेभी रश्मिभि. ।          * मृडयाति शुक्रेभि *
उदुम्बरस्य शाखया विचक्षुषाशनिं यावयान् इत. ॥४॥          * * शन यावयाद् *

¿ घन्ता भुवन्तम् ? आ क्राम पर्वताद् अधि पर्वतम् ।
गिरौ प्रतिश्रिता सती ¿ श्रृक्षां भमक्धि सावयम् ? ॥५॥ गिरौ प्रतिश्रुता
¿ यद्वान्या त्वा सत्या निया यन्या परिभूर्ण्यो ? ।
मानौ प्रतिश्रिता सती ¿ तण भरमग्धि मावयम् ? ॥६॥ मानो प्रतिश्रुतस
उषती नामासि सद्विन्द्वा नाम ।
अम्याम् आसा गच्छ य ह्निष्मस् त गच्छ ॥७॥
पराचीम् अनु सघत पराच्य् अनु [निर्] द्रव । * * सम्यत * अनु
अद्रस् त्वा नाशयामसि ब्रह्मणा वीर्यावता ॥८॥ यद्रस
घार् भवोदक भवोदकस्योदक भव ।
क्षुद्रा[द्] क्षोदीयसी भूत्वाथाय् अधमं तम. ॥९॥ * * भूत्वा यथेश् * *
स्योना भव शग्मा भव शिवाच् छिवतरा भव ।
फनाद् ईम् ऋजीयसी भूत्वेद् साव्यम् उपाचर ॥१०॥ * इम साह्यम् उपचार
नमस् ते ऽस्तु विद्युंत नमस् ते स्तनयित्नवे ।
नमस् त ऽश्न दूरहेते कृण्मो मा नो हिंसीर् द्विपदो मा चतुष्पद. ॥११॥ दूरहेती कृण्वो
प्रति त्वा सास्माह सहस् सहा प्रतिरोधुम् असि । * * सासहा * * सहा प्रति * *
इहेन्द्र इव सुमहद् भूम्या अस्तभ्नोद् दिवि श्रितम् ॥१२॥ इहेन्द्रम् * सोमहद्भूम्यास्तभ् * श्रुतम्
अफालकृष्टम् आ क्राम मा न इन्द्रव वधी. । * अ इन्द्र इम *
यास् समुद्राद् उच्च[र]न्त्य उत्सेभ्यो या नदीभ्य. । उत्सभ्यो * * ॥१३॥
अत्यन्तस् सर्पो वैद्युतो अशनिं यावयाद् इत. ॥१३॥ ॥का°४॥ ॥अनु°५॥ अशन * *

इत्यथर्ववेदे पैप्पलादशाखायां पञ्चदशः काण्डस् समाप्तः ॥ इत्यथर्वणिकपैप्पलादयहशाखायां * काण्डस् समाप्तः ॥ ॥ ॥ काण्ड. १५ ॥

शौ ८ १ ## १६.१

{ ओं नमो गणाधिपतये ॥ ओं नमो ज्वाला-भगवत्यै ॥ ओं नमस् तिलोत्तमायै ॥ ओं नमश् शिवाभगवत्यै ॥ ओं }

अन्तकाय मृत्यवे नम इहायम् अस्तु पुरुषस् सहासुना ।
सूर्यस्य भागे अमृतस्य लोके प्राणा अपाना इह ते रमन्ताम् ॥१॥ प्राणापाना
उद् एन भगो अग्रभीद् उद् एन सोमो अंशुमान् । * अयन अयन * *
उद् एन मरुतो देवा उद् इन्द्राग्नी स्वस्तये ॥२॥ * अयन
[१]५४ शौ इह ते ऽसुर् इह प्राण इहायुर् इह ते [म]न. । पतघुर्षाय प्राणर * * * *
उत् त्वा निर्ऋत्या पाशभ्यो दैव्या वाचा भरामसि ॥३॥
| | त्नहा ? ॥८॥ | |
| शौ ३४ | [विष्णो× क्रमो ऽसि] सपत्नहा कृषिसशित× पुरुषतेजा । | सपत्ना कृतिश्शमित पुरुषतेजा· |
| | कृषिम् अनु वि क्रमे ऽहं कृष्यास् त [निर् भजामो | * * * क्रम य कृष्यात् * |
| | [यो ऽस्मान् द्वेष्टि य वय द्विष्म । | |
| | [अपरजान् सपत्नान् अवैनान् बाधे $_6$ तेनाप्राक्रामान्वपाम् अपनुत्तस् सप- | |
| | त्नहा ? ] ॥९॥ | |
| शौ ३५ | विष्णो× क्रमो ऽसि सपत्नहा प्राणसशितो अन्नतेजा । | प्राणश्शमितो * |
| | प्राणम् अनु वि क्रमे ऽहं प्राणात् त निर् भजामो | * * * क्रम य * * * * |
| | यो ऽस्मान् द्वेष्टि यं वय द्विष्म । | यो स्मान् द्वेष्टि य वयं द्विष्मं |
| | [अपरजान् सपत्नान् अवैनान् बाधे $_6$ तेनाप्राक्रामान्वपा अपनुत्तस् सप- | |
| | त्नहा ? ] ॥१०॥ ॥का° ५॥ | |

१६ १३२

| | | |
|---|---|---|
| शौ १० ५ ३६ ? ? | अगम स्वर् अगम ज्योतिर् अभ्य् अष्टा विश्वा× पृतना अरातीः ॥१॥ | अगमो * * * नि ष्टवा * * रातीम् |
| शौ ३७ | स्वभ्यावर्तये ? सूर्यस्यावर्तम् अन्वावर्ते दक्षिणाम् अन्व् आवृतम् । | * °वृतम आनावृते * अनावृतम् |
| | [सा मे द्रविण यच्छतु सा मे ब्राह्मणवर्चसम् ] ॥२॥ | |
| शौ ३८ | दिशो ज्योतिष्मतीर् अभि पर्यावर्ते । | * ज्योतिष्मतर * पर्यावर्ते |
| | [ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम् ] ॥३॥ | |
| शौ ३९ | सप्तऋषीन् अभि पर्यावर्ते । | |
| | [ते मे द्रविण यच्छन्तु ते मे ब्राह्मणवर्चसम् ] ॥४॥ | |
| शौ ४० | ब्रह्माभि पर्यावर्ते । | |
| | [ते म द्रविण यच्छन्तु ते मे ब्राह्मणवर्चसम् ] ॥५॥ | |

ब्राह्मणान् अभि पर्यावर्ते ।

शौ ४५ ते मे द्रविण [य]च्छन्तु ते मे ब्राह्मणवर्चसम् ॥६॥ * * मद्रविणे

यत् ते ऽन्न भुवस् पत आक्षियति पृथिवीम् अनु । * * * मोस * आक्षीत * *

शौ ४२ तस्य नस् त्वं भुवस् पते सम्प्रयच्छ प्रजापते ॥७॥ * * * भुवनस् * मप्रयछत् *

[ ये वयं मृगयामहे त वधैस् स्तृणवामहै ] ।

शौ ४३ व्यात्ते परमेष्ठिनो ब्रह्मणापीपदाम तम् ॥८॥ व्याते * ब्रह्मणोदीपदामृतम्

वैश्वानरस्य दंष्ट्राभ्या हेतिस् त सम् अधाद् अभि । त्व * उदाद् इभि

शौ ४४ इयं त रात्व् आहुतिस् समिद् देवी सहीयसी ॥९॥ य तश् छात्व्

राज्ञो वरुणस्य बन्धो ऽसि । * वरुणोसि * *

शौ ५० सो ऽमुम् आमुष्यायणम् अमुष्याः पुत्रम् अन्ने प्राणे बधान ॥१०॥ * मन् अमु° * पुतम् अह्ने * दधन

अपाम् अस्मै वज्रं प्र हरामि चतुर्भृष्टिं शीर्षभिद्याय विद्वान् । अपान् चतुर्भिष्च * *

शौ ७ ६ १ १ सो ऽस्य पर्वाणि प्र शृणातु सर्वा तन् मे देवा [अ]नु जानन्ति विश्वे ॥११॥ * * सर्वान् पृ श्रीणातु

यद् अग्ने तपसा तप उप प्रेक्षामहे वयम् ।

प्रिया[ः] श्रुतस्य भूयास्मायुष्मन्तस् सुमेधस. ॥१२॥ ॥का° ६॥

शौ ८ १० १-२३

## १६ १३३

विराड् वा इदम् अग्र ऽजायत । * * यदम्

तस्या जाताया अबिभेत् सर्वम् इ[य]म् एवेद भविष्यति न वयम् इति ॥१॥ * * * बिभेक

[ सोद् अक्रामत् सा गार्हपत्ये न्य् अक्रामत् ।

[ गृहमेधी गृहपतिर् भवति य एव वेद ॥२॥

[ सोद् अक्रामत् साहवनीये न्य् अक्रामत् ।

[ यन्त्य् अस्य देवा देवहूतिं प्रियो देवानां भवति य एव वेद ॥३॥ ]

सोद् अक्रामत् सा दक्षिणाग्नौ न्य् अक्रामत् ।

यज्ञर्तो वासतेयो भवति य एवं वेद ॥४॥ यशन्तो वामतयो

[ सोद् अक्रामत् ] सा सभायां [ न्य् अक्रामत् ] । * सभायामि

[यन्त्य्] अस्य सभां सभ्यो भवति [य एव वेद] ॥५॥ यस्य * सत्यो

[ सोद् अक्रामत् ] सा समितौ न्य् अक्रामत् ।

[ यन्त्य् अस्य समितिं सामित्यो भवति य एव वेद ॥६॥ ]

[ सोद् अक्रामत् ] सामन्त्रणे न्य् अक्रामत् ।

यन्त्य् अस्यामन्त्रणम् आमन्त्रणीयो भवति य एवं वेद ॥७॥ यशन्तो वामतयो भवति * * *

सोद् अक्रामत् सान्तरिक्षे चतुर्धा विक्रान्तातिष्ठत् । व्यकान्तातिष्ठत्

तां देवमनुष्या अब्रुवन्न् इयम् एव तद् वेदोभयं यद् उपजीवेमेमाम् उप ह्वयामहा इ[ति] ॥८॥ तन् * ब्रवन् यन्तर वेद उभयम् उपजीवेमेमाम् * ह्वयामाहि

ताम् उपाह्वयन्त ऊर्ज एहि स्वध एहि सूनृत एहीरावत्य् एहीति ॥९॥ * °ह्वयन्त ऊर्जयेहि स्वधेहि सुनृत्येहि ऐरवत्येहि

तस्या [अ]ग्निर् वत्स आसीद् गायत्र्य् अभिधान्य् अभ्रम् ऊध । * * वत्सामीत् गयत्री आभदान्य् अप्रम् ओद

तस्या बृहच् च र[थ]न्तर च द्वौ स्तनाव् आस्तां यज्ञायज्ञियं च वामदेव्यं च द्वौ ॥१०॥ द्रो स्तनपास्या यज्ञायज्ञ * *

ओषधीर् एव रथन्तरेण देवा अदुह्रन् व्यचो बृहता । * वे * * दुह * गृहत

अपो वामदेव्येन यज्ञ यज्ञायज्ञियेन ॥११॥ °यज्ञय

शौ नास्ति ये ते वै विराजः कामधुगास् स्तनाः कामकाम यजमान दोह्यन् ॥१२॥ कामधुगस्तना दुहय

॥का° ७॥

शौ ८ १० २४-३१

## १६ १३४

[सोद् अक्रामत् । सा] वनस्पतीन् आगच्छत् । तां वनस्पतयो ऽघ्नत । सा संवत्सरे सम् अभवत् ।

तस्मात् संवत्सरे वनस्पतीनां वृक्णम् अपि रोहति वृश्चते ऽस्याप्रियो भ्रातृव्यो [य एव वेद ॥१॥ * * * वृक्णम् अवि रोहतु पत्यदस्याप्रिय भातृव्यम्

[सोद् अक्रामत् ।] सा पितॄन् आगच्छत् । तां पितरो ऽघ्नत । सा मासे सम् अभवत् । * पितुणा गइछत्

| | | |
|---|---|---|
| | तस्मान् मासे पितृभ्यो ददाति स्वधावान् पितृषु भवति [प्र] पितृयाण | * * * ददतस् पितृयाणं |
| | पन्था जानाति य [एव वेद] ॥२॥ | * * व |
| | [सोद् अक्रामत्।] सा देवान् आगच्छत् । तां देवा [अ]घ्नत । सार्धमासे | • |
| | सम् अभवत् । | |
| | तस्माद् अर्धमासे देवेभ्यो जुहोति जुहोत्य् अग्निहोत्रं प्र देवयानं पन्था | * * * जुहुति |
| | जानाति [य एव वेद] ॥३॥ | जानाति |
| | [सोद् अक्रामत्।] सा मनुष्यान् आगच्छत् । ता मनुष्या [अ]घ्नत । सा | * मानुष्याण |
| | सद्यस् सम् अभवत् । | |
| | तस्माद् उभयद्युर् मनुष्याणा[म्] उप हरन्त्य् उपास्य [गृहे] भवन्ति य | * उभयदुर् उपास्यो भवन्ति य |
| | [एवं वेद] ॥४॥ ॥का° ८॥ | |
| | १६ १३० | |
| शौ ८ १० ३२–३५ | [सोद् अक्रामत् । ] सासुरान् आगच्छत् । ताम् असुरा उपाह्वयन्त माय | मासुराण् * * असुराम् * मायो |
| | एहीति । | हीति |
| | तस्या विरोचन× प्राह्रादिर् वत्स आसीद् अयस्पात्रं पात्रम् । | तस्या वैरोचन प्रहरादुर् वत्मासीद् * * |
| | तां द्विमूर्धार्त्व्यो ऽधोक् तां मायाम् अधोक् । | * द्विमूर्धादित्या |
| | तां मायाम् असुरा उप जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥१॥ | |
| शौ ४०–४३ | [सोद् अक्रामत्।] सा मनुष्यान् आगच्छत् । ता मनुष्या उपाह्वयन्तेरावत्य् | * मानुष्याण ×पाह्वयत्य् पेरावत्य् |
| | एहीति । | |
| | तस्या मनुर् वैवस्वतो वत्स आसीत् पृथिवीपात्रं पात्रम् । | * * * वत्सामीत् * * |
| | तां पृथी वैन्यो ऽधोक् तां कृषिं च सस्यं चाधोक् । | * पृथुर् |
| | तां कृषिं च सस्यं च मनुष्या उप [जीवन्त्य् उपजीवनीयो भवति य एवं | |
| | वेद ॥२॥ | |
| शौ ३६–३९ | [सोद् अक्रामत्।] सा पितॄन् आगच्छत् । ता पितर उपाह्वयन्त स्वध | } * पितृण * * पितरोमाह्वयन्त स्वधयेहिति |
| | एहीति । | |
| | तस्या यमो वत्स आसीद् रजतपात्रं पात्रम् । | * * वत्मासीद् * * |
| | ताम् अन्तको मार्त्यवो ऽधोक् तां स्वधाम् अधोक् । | * अ तको आदित्यो |
| | तां स्वधां पितर उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥३॥ | |
| शौ ४८–५१ | [सोद् अक्रामत्।] सा देवान् आगच्छत् । ता देवा उपाह्वयन्तोर्ज एहीति । | उयाह्वयन्त्य ऊजयेहीने |
| | तस्या इन्द्रो वत्स आसीद् दारुपात्रं पात्रम् । | * * वत्मासीद * * |
| | तां सविताधोक् ताम् ऊर्जाम् [अधोक् । | * * नम् ऊर्ज |
| | [ताम् ऊर्जां] देवा उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥४॥ | * उपापा |
| शौ ४४–४७ | [सोद् अक्रामत्।] सा सप्तऋषीन् आगच्छत् । ता सप्तऋषय उपाह्वयन्त | * सप्तऋषीण सप्तऋषयोपाह्वयन्त |
| | ब्रह्मण्वत्य् एहीति । | |
| | तस्यास् सोमो वत्स आसीच् छन्द×पात्रं पात्रम् । | * * वत्मासीत * * |
| | तां बृहस्पतिर् आ[ङ्गिर]सो ऽधोक् तां ब्रह्म च तपश् चाधोक् । | * * भमा |
| | तद् ब्रह्म च तपश् च सप्तऋषय उप [जीवन्त्य् उपजीवनीयो भवति य एवं | ता उपा |
| | वेद ॥५॥ | |
| | [सोद् अक्रामत् ।] सा गन्धर्वाप्सरस आगच्छत् । तां गन्धर्वाप्सरस | * गन्धर्वाप्सरसान् * * °प्सरमा |
| | उपाह्वयन्त पुण्यगन्ध [ए]हीति । | * पुण्यगन्ध * |
| | तस्या× कुबेरो वैश्रवणो वत्स आसीद् दारुपात्रं पात्रम् । | * कौवेरो * वत्मासीद् * * |
| | तां रजतनाभि× काबेरको ऽधोक् तां पुण्यगन्धम् अधोक् । | * तनाभि |
| | तं पुण्यगन्धं गन्धर्वाप्सरस उप [जीवन्त्य् उपजीवनीयो भवति य एवं | ता * * °प्सरमा उपा |
| शौ ५२–५९ | वेद ॥६॥ | |
| | [सोद् अक्रामत्।] सा पुण्यजनान् आगच्छत् । ता पुण्यजना उपाह्वयन्[त] | |
| | तिरोध एहीति । | तिरोधा यहीति |
| | तस्या चित्ररथस् सौर्यवर्चसो वत्स आसीत् पुष्करपर्णपात्रं पात्रम् । | * वसुरुम सूर्यवचमो वत्मासीत् °पर्णपात्र * |
| | तां वसुरुचिस् सौर्यवर्चसो ऽधोक् तां तिरोधाम् अधोक् । | * वसुतुम सूर्यवचमा |
| | तां तिरोधां पुण्यजना उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद] ॥७॥ | * * * उपा |

| | | |
|---|---|---|
| शौ ६०–६३ | सोद् अक्रामत् । सा सर्पान् आगच्छत् । ता सर्पा उपाह्वयन्त विषवत्य् एहीति । | |
| | तस्यास् तक्षको वैशालेयो वत्स आसीद् अलाबुपात्र [पात्रम्] । | * * विषाभयो वत्सासीद् अलापुपात्र |
| | त धृतराष्ट्र ऐरावतो ऽधोक् तां विषम् अधोक् । | ता धृतराष्ट्रैरावृतो । ता विषम् अधोक् |
| | तद् विष सर्पा उप जीवन्त्य् [उपजीवनीयो] भवति य एवं वेद ॥८॥ | * * * उपाजीवन्त्यो |
| शौ ६४–६७ | तस्माद् यस्या अलाबुनाभिषिञ्चेत् [प्रत्याहन्यात् । | * यस्माद् अलाबुनाभिषिञ्चेन् |
| | [न च प्रत्याहन्यान्] मनसा त्वा प्रत्याहन्मीति प्रत्याहन्या[त्] ॥९॥ | * * °हन्मीयतु * |
| | यत् प्रत्याहन्ति विष प्रत्याहन्ति तम् अनुप्रषिच्यते विषम् । | * °हर्तु * °हर्तुमनु प्रसुजज्यते * |
| | अस्याप्रिय भ्रातृव्य हन्ति य एव वेद ॥१०॥ ॥का° ९॥ ॥अनु° १९॥ | अस्य-प्रिय |

१६ १३६

| | | |
|---|---|---|
| शौ १० ९ १ | अघायताम् अपि नह्या मुखानि सपत्नेषु वज्रम् अर्पयैतम् । | * * निध्या * सपत्नीषु * अर्पयीतुम् |
| | इन्द्रेण दत्ता प्रथमा शतौदना भ्रातृव्यघ्नी यजमानाय गातु ॥१॥ | * दत्ताः भ्रातृव्याघ्नी * गातू |
| शौ २ | वेदिस् ते चर्म भवति बर्हिर् लोमानि यानि ते । | वेहिस् |
| | एषा त्वा रशनाग्रहीद् ग्रावा त्वैषो अधि नृत्यतु ॥२॥ | * द्रा दशनागृहैर् ग्राव द्वेषो |
| शौ ३ | बालास् ते प्रोक्षणी[स्] सन्तु जिह्वा स मार्ष्ट्य् अघ्न्ये । | * * * यन्तु अघ्ने |
| | शुद्धा त्व यज्ञिया भूत्वा दिव प्रेहि शतौदने ॥३॥ | |
| शौ ४ | यश् शतौदनां पचति कामप्रेण स [क]ल्पते । | स्य * |
| | प्रीता ह्य् अस्य ऋत्विजस् सर्वे यन्तु यथायथम् ॥४॥ | |
| शौ ७ | ये त देवि शमितारः पक्तारो ये च ते जनाः । | ५ * * * प्रोक्षयेरो च * * |
| | ते त्वा सर्वे गोप्स्यन्ति मैभ्यो भैषीश् शतौदने ॥५॥ | * * * गस्मन्तु सखिभ्यो * शतोदने |
| शौ ५[१,२] | स स्वर्गम् आ रोहतु यत्रादस् त्रिदिव दिवः । | सस त्रदिव * |
| शौ ६[३,४] | हिरण्यज्योतिष कृत्वा यो ददातु शतौदनाम् ॥६॥ | |
| [१]शौ ६[१] | स ताल् लोकान् सम् आप्नोति येषु देवास् समासते । | श ता |
| शौ ५[३,४] | अपूपनाभि कृत्वा यो द[दाति शतौद]नाम् ॥७॥ | अपूपानाभि |
| शौ ८ | वसवस् त्वा दक्षिणत उत्तरान् मरुतस् त्वा । | मरुतास * |
| | आदित्याः पश्चाद् ? गोप्स्यन्ति साग्निष्टोमम् अति द्रव ॥८॥ | * मत्रा गोप्सन्तु * अभि द्रवा |
| शौ ० | गन्धर्वाप्सरसो देवा रुद्राङ्गिरसश् च ये । | * देव °ङ्गिरसस् त्वा |
| | ते त्वा सर्वे गोप्स्यन्ति सातिरात्रम् अति द्रव ॥९॥ | * * मर्व गोप्सन्तु द्रवा |
| शौ १० | अन्तरिक्ष दिव भूमिम् आदित्या[न्] मरुतो दिश । | |
| | लोकां[श्] च सर्वान् आप्नोति यो ददातु शतौदनाम् ॥१०॥ ॥का° १॥ | |

१६ १३७

| | | |
|---|---|---|
| शौ १० ० ११ | घृत प्रोक्षन्ती सुभगा देवान् देवी गमिष्यति । | |
| | पक्तारम् अघ्न्ये मा हिंसीर् दिव प्रेहि शतौदने ॥१॥ | * अग्नि शतोदने |
| शौ १२ | पितरो दिविषदो ऽन्तरिक्षसदश् च ये ये चेमे भूम्या[म्] अधि । | चेमे * * |
| | तेभ्यस् त्व धुक्ष्व सर्वदा क्षीर सर्पिर् अथो मधु ॥२॥ | * तन् दुक्ष |
| शौ १३–१४ | यत् ते शिरो ये शृङ्गे यौ कर्णौ या च ते अक्ष्यौ । | शृङ्गा अक्षो |
| | आमिक्षा दुह्रता दात्र क्षीर सर्पिर् अथो मधु ॥३॥ | अहमिक्षा |
| | यत् ते मुख या जिह्वा ये दन्ता य च ते हनू । | * * * ये * * * या |
| | [आमिक्षा दुह्रता दात्र क्षीर सर्पिर् अथो मधु] ॥४॥ | |
| शौ १५ | यत् ते क्लोमा य[द्] धृदय पुरीतत् सहकण्ठिका । | |
| | [आमिक्षा दुह्रता दात्र क्षीर सर्पिर् अथो मधु] ॥५॥ | |
| शौ १६ | यत् ते [य]कृद् ये मतस्ने या[न्य् आ]न्त्राणि याश् च ते गुदाः । | * * * दे वतस्ते य * * * गुदा |
| | [आमिक्षा दुह्रता दात्र क्षीर सर्पिर् अथो मधु] ॥६॥ | |
| शौ १७ कोशेषु भूयिष्ठ पलाशि | यस् त प्लाशुर् यो वनिष्ठुर् यौ [कु]क्षी यच् चोदरम् । | यत * पशुर् * वनयुर् यो * यश्च * |
| | [आमिक्षा दुह्रता दात्र क्षीर सर्पिर् अथो मधु] ॥७॥ | |
| शौ १८ | यत् ते मज्जा याश् अस्थीनि यन् मास यच् च लोहितम् । | |

| | | |
|---|---|---|
| | [आमिक्षां दुह्रतां दात्र क्षीर सर्पिर् अथो मधु] ॥८॥ | |
| शौ १९ | यौ त बाहू यौ ते असौ ये दोषणी या च ते ककुत् । | दुहन * * * * |
| | [आमिक्षां दुह्रता दात्र क्षीरं सर्पिर् अथो मधु] ॥९॥ | |
| शौ २० | य ते स्कन्धा या ग्रीवा या× पृष्टीर् याश् च पर्शव । | यत् * स्कन्दा * * यास् पर्षव, |
| | [आमिक्षा दुह्रता दात्र क्षीर सर्पिर् अथो मधु] ॥१०॥ ॥का॑२॥ | |

१६ १३८

| | | |
|---|---|---|
| शौ १० ९ २१ | यौ त ऊरू अष्ठीवन्तौ ये श्रोणी या च ते भसत् । | * भूरू अष्ठि॑ * श्रुणा |
| | [आमिक्षां दुह्रतां दात्र क्षीर सर्पिर् अथो मधु] ॥१॥ | |
| शौ २२ | यत् त पुच्छ ये [त] वाला [य]द् ऊधो ये च ते स्तना । | * * * यो उग्ध यश् * * स्तना |
| | [आमिक्षां दुह्रतां दात्र क्षीर सर्पिर् अथो मधु] ॥२॥ | |
| शौ २३ | यास् त जङ्घा या× कुष्ठिका ऋच्छरा य च त शफा । | कुष्ठिका ह्रत्मरा * * * शफा |
| | [आमिक्षां दुह्रता दात्र क्षीर सर्पिर् अथो मधु] ॥३॥ | |
| शौ २४ | यत् त चर्म शतौदन यानि लोमान्य् अघ्न्य । | अंघ्न |
| | आमिक्षां दुह्रता दात्र क्षीरं सर्पिर् अथो मधु ॥४॥ | अहमिक्षार् दुहन नात्रे |
| | अय त शुनामिक्षाम् अय सर्पिर् अथो मधु । | अय * |
| | अय ते सर्वकान् दुहां देवि शतौदन ॥५॥ | * * मर्वाकान् दुफा * शतोदने |
| शौ २५ | क्रोडौ त स्ता पुरोडाशाव आज्येनाभिघारितौ । | क्रडो त हस्त * ॰घारते |
| | तौ पक्षौ देवि कृत्वा सा दातार दिव वह ॥६॥ | * * दव दिव * |
| शौ २६ | उलूखल मुसलं यश् च चर्मणि यो वा शूर्पे तण्डुल× कण । | य * * तण्डुला॰ कणा |
| | य वा वातो मातरिश्वा ममाथाग्निष् टद् धोता सुहुत कृणोतु ॥७॥ | यद् * * * ममाताग्निष ट्वद् |
| शौ २७ | इमा अपो मधुमतीर् घृतश्चुतो ब्रह्मणां हस्तेषु प्रपृथक् सादयामि । | * आपो * ॰श्चोतु ब्रह्मणा * * छादयामि |
| | यत्काम इदम् अभिषिञ्चामि वो ऽह तन् नो [सर्व स पद्यता] | यत्कामाभिम् * * * * * |
| | वय स्याम पतयो रयीणाम् ॥८॥ ॥का॑३॥ | वयं स्याम् पतयो रयीणा |

१६ १३९

| | | |
|---|---|---|
| शौ ९ ७ १ | प्रजापतिश् च परमेष्ठी च शृङ्ग इन्द्रश् शिरो अग्निर् ललाट [यम× कृकाटम्] ॥१॥ | प्रजापतिष् इन्द्रम मो अग्निन् लोलाट |
| शौ २ | सोमो राजा मस्तिष्कस् सत्य चक्षुर् ऋतं श्रोत्रे प्राणापानौ नासिके | सोमामो इत * * नामिवते |
| | द्यौर् उत्तरहनु× पृथिव्य् अधर[हनु] ॥२॥ | * उत्तरा × अनु * आधरा |
| शौ ३१ | अग्निर् आस्य विद्युज् जिह्वा मरुतो दन्ता× पवमान× प्राण. ॥३॥ | |
| शौ ४ | विश्वं वायुस् स्वर्गो लोक× कृष्णद्र विधरणी निवेष्य ॥४॥ | * * कण्ठस्स्वर्गो * कृष्णद्रव्यद्रिणी विवइव |
| शौ ३२ | रेवती[र्] ग्रीवा॰ कृत्तिकास् स्कन्धा घर्मो वह ॥५॥ | वश् |
| शौ ५१ | श्येन× क्रोडो अन्तरिक्ष पाजस्यम् ॥६॥ | श्येन |
| शौ ७,५२ | मित्रश् च वरुणश् चासौ त्वष्टा चार्यमा च दोषणी ॥७॥ | ना दोहनी |
| | महादेवो बाहू बृहस्पति× ककुद् बृहती× कीकसा ॥८॥ | |
| शौ ६ | देवाना पत्नी× पृष्ट्य उपसद× पर्शव ॥९॥ | देवाना पत्नी पृष्टया * परिमव |
| शौ ९ | ब्रह्म च क्षत्र च श्रोणी बलम् ऊरू ॥१०॥ | ऊरौ |
| शौ १० | धाता च सविता चाष्ठीवन्तौ जङ्घा गन्धर्वा [अ]प्सरस× कुष्ठिका अदितिश् शफा. ॥११॥ | ऋतश् शफा |
| शौ ११ | चेतो हृदय [य]कृन् मेधा ; हरिमा पितु ? व्रत पुरीतत् ॥१२॥ | |
| शौ १२ | क्षुत् कुक्षिर् इरा वनिष्ठु× पर्वता× प्लाशय ॥१३॥ | क्षुत कुक्ष तरा वनिष्ठ पवता प्राश |
| शौ १४ | देवजना गुदा मनुष्या [आ]न्त्राण्य् अत्रा उदरम् ॥१४॥ | दवयजना अत्रा * |
| शौ १७ | इतरजना ऊबध्य रक्षांसि लोहितम् ॥१५॥ | |
| शौ १३ | क्रोधो वृक्कौ मन्युर् आण्डौ प्रजा शेप ॥१६॥ | क्रुद्धो प्रजा * |
| शौ १४ | समुद्रो वस्तिर् नदी सूत्री स्तनयित्नुर् ऊधो वर्षस्य पतय[स्] स्तना[ ] ॥१७॥ | * वस्तिन् * अत्रा |
| शौ १५ | विश्वव्यचाश् चर्मौषधयो रोमाणि नक्षत्राणि रूपम् ॥१८॥ | विश्वव्यचश चर्म आषधयो |
| शौ १८ | अस्थ पीवो मज्जा निधनम् ॥१९॥ | * पवे |
| शौ २६ | [ईशानो] भूत्या× प्रजाया× पशूनां भवति य एव वेद ॥२०॥ | |

| | | |
|---|---|---|
| शौ २० | इन्द्र× प्राङ् तिष्ठन् दक्षिणा तिष्ठन् यम ॥२१॥ | इन्द्र प्री तिष्ठन् |
| शौ २१ | प्रत्यङ् तिष्ठन् धातोदङ् तिष्ठन् सविता ॥२२॥ | प्रत्यं * धातोदं |
| शौ २२ | तृणानि प्राप्तस् सोमो राजा ॥२३॥ | नृणान् |
| शौ २३ | आवृत्त आनन्द ईक्षमाणौ मित्रावरुणौ ॥२४॥ | वृतानन्द ईक्षमाणो °वरुणो |
| शौ २४ | युज्यमानो वैश्वानरो युक्त× प्रजापतिर् विमुक्तस् सर्वम् ॥२५॥ | |
| शौ २५ | एतद् वै विश्वरूपम् ॥२६॥ | * * वोरूपम् |
| शौ २६ | उपैन रूपवन्त× पशवस् तिष्ठन्ति य एव वेद ॥२७॥ ॥का° ४॥ ॥अनु° १०॥ | * रूपवतः * तिष्ठन्ति य एवं वेद |

१६ १४०

| | | |
|---|---|---|
| | | * * * * बिचृत्ये श्रुता |
| शौ १२ ५ १-६ | श्रमेण तपसा सृष्टा ब्रह्मणा वित्त ऋते श्रिता ॥१॥ | |
| | सत्येनावृता श्रिया प्रावृता यशसा परिवृता ॥२॥ | |
| | स्वधया परिहिता श्रद्धया पर्यूढा दीक्षया गुप्ता यज्ञे प्रतिष्ठिता लोको निधनम् ॥३॥ | क्षीक्षया * * * * |
| | छन्दांसि रूपम् अङ्गिरसस् सतापा ब्रह्म पदवायं ब्राह्मणो अधिपति॰ ॥४॥ | |
| | ताम् आददानस्य ब्रह्मगवीं जिनतो ब्राह्मण क्षत्रियस्य ॥५॥ | * आदधानस्य °गवी जिन्वतो * * |
| | अप क्रामतु सूनृता वीर्यं पुण्या लक्ष्मी॰ ॥६॥ ॥का° १॥ | पुण्य * |

१६ १४१

| | | |
|---|---|---|
| शौ १२ ५ ७-११ | ओजश् च तेजश् च सहश् च बल च वाक् चेन्द्रिय च श्रीश् च धर्मश् च ॥१॥ | |
| | ब्रह्म च क्षत्र च राष्ट्र च विशश् च त्विषिश् च यशश् च वर्च्चश् च द्रविण च ॥२॥ | * * * * * * विशिश |
| | आयुश् च [रूप च नाम च कीर्त्तिश् च प्राणश् चापानश् च चक्षुश् च] श्रोत्र च ॥३॥ | |
| | [पयश् च रसश् चान्नं चान्नाद्य च ऋत च सत्य चेष्ट च पूर्त च प्रजा च पशवश् च] ॥४॥ | |
| | तानि सर्वाण्य् अप क्रामन्ति [ब्रह्मगवीम् आददानस्य जिनतो ब्राह्मण] क्षत्रियस्य ॥५॥ ॥का° २॥ | |

१६ १४२

| | | |
|---|---|---|
| शौ १२ ५ १२ कूल्बजम् | ब्रह्मगव्य् अघविषा कृत्या पूल्पाण्यज ? आवृता ॥१॥ | * अधदविषा |
| शौ १३ | सर्वाण्य् अस्यां घोराणि सर्वे च मृत्यव॰ ॥२॥ | |
| शौ १४ | सर्वे पुरुषवधा[ ] ॥३॥ | |
| शौ १५ | सा ब्रह्मज्य ब्रह्मगव्य् आनीयमाना मृत्यो× पड्वीश आ द्यति ॥४॥ | * * * आनियमाना * पड्विषा दिनि |
| शौ १६ | मनिश् शतवधा हि सा ब्रह्मज्यस्य क्षितिर् हि सा ॥५॥ | मनश् * * * * क्षतुर् य शा |
| शौ १९$^{१}$ | महादवो नापेक्षमाणा ॥६॥ | * नपेक्षमाणा |
| शौ १८$^{१}$,१९$^{१}$,२०$^{१}$ | वज्रो धावन्ती हतिश् शफा[न्] निरूहन्ती क्षुरपविर् ईक्षमाणा ॥७॥ | * धावन्ति * * * निनृषन्ती क्षुरुपवद् * |
| शौ २१$^{१}$,२०$^{२}$ | मृत्युर् हिङ्कृण्वती वाश्यमानानु स्फूर्जयति ब्रह्मगवी ब्रह्मज्यम् ॥८॥ ॥का° ३॥ | * अहकृण्वतों वाच्यमानान * * ब्रह्मज्यस्य |

१६ १४३

| | | |
|---|---|---|
| शौ १२ ५ २१$^{२}$-२७ | उग्रो देव× पुच्छ पर्यस्यन्ती ॥१॥ | |
| | सर्वज्यानि× कर्णौ वरीवर्जयन्ती राजयक्ष्मो मेहन्ती ॥२॥ | °ज्यानिषू कर्णैर विरीवर्जयन्ती * हिमन्ती |
| | मेनिर् दुह्यमाना शीर्षक्तिर् दुग्धा ॥३॥ | मुनिर् |
| | सेदिर् उपतिष्ठन्ती मिथोयोध× परामृष्टा ॥४॥ | म्वेदर् |
| | शरव्या मुखे ऽपिनह्यमान ऋतिर् हन्यमाना ॥५॥ | शर्व्यो * पिनीयमानो ऋतुर् हन्यमानो |
| | गृध्रा हिताघविषा व्यथन्ती तमो निपतिता ॥६॥ | गृध्र हिताघदविपा व्यतन्ती यतमो नुमतीत |
| | अनुगच्छन्ती प्राणान् उप दासयति ब्रह्मगवी ब्रह्मज्यस्य ॥७॥ ॥का° ४॥ | ब्रह्मज्यम् |

## १६ १४४

| | | |
|---|---|---|
| शौ २८ | वैरं विकृत्यमाना पौत्राद्यं विभाज्यमाना ॥१॥ | पौत्राज्य विभज्यमानान् |
| शौ २९ | देवहेतिर् ह्रियमाणामतिर् हिता निर्ऋतिर् निहिता ॥२॥ | देवहेतु ह्रनह्रमानामतिर् |
| शौ ३० | पाप्मा निधीयमाना पारुष्यम् अवधीयमाना ॥३॥ | पार्श्वम् अविधीयमाना |
| | घर्म× परिधीयमाना वैश्वानर× परिहिता ॥४॥ | * पर्यधीयमाना * पयाहिता |
| शौ ३१ | विष प्रयस्यन्ती तक्मा प्रयस्ता ॥५॥ | * प्रयस्वन्ती * प्रयस्तान् |
| शौ ३३[१],३४[१] | मूलबर्हिणी पर्याक्रियमाणा सेवकमयक्षा ? गन्धेन ॥६॥ | * पयाकीयनाणा |
| शौ ३२[१],३५[१] | अघ पच्यमाना पराभूतिर् उपहूता ॥७॥ | उपरिताम् |
| शौ ३६ | शर्व× क्रुद्ध× पिश्यमाना शिमिदा पिशिता ॥८॥ | सर्वा× क्रथ- पिश्यमाणा ममिता पिशता |
| शौ ३७ | अवर्तिर् अश्यमाना निर्ऋतिर् अशिता ॥९॥ | आतिर् अस्यमाना वेकर्तु असिता |
| शौ ३८ | अशिता लोकाच् छिनत्ति ब्रह्मचारी ब्रह्मज्यम् अस्माच् चामुष्माच् च ॥१०॥ ॥का° ५॥ | सिनो लोकाश |

## १६ १४५

शौ १२ ५ ३९–५०

| | |
|---|---|
| तस्या [आ]हनन कृत्या मेनिर् आशसनं बलगहनम् ऊबध्यम् ॥१॥ | ऊवद्ध यर |
| अस्वगता मलिन्वता ? ॥२॥ | अस्वगता * |
| [अ]ग्नि× क्रव्याद् भूत्वा ब्रह्मगवी ब्रह्मज्य प्रविश्यात्ति ॥३॥ | * क्रव्याद प्रविश्याति |
| सर्वास्याङ्गा मूलानि वृश्चति ॥४॥ | सर्वामागा * वृश्चिना |
| छिनत्त्व् अस्य पितृबन्धु परा भावयतु मातृबन्धु ॥५॥ | दिछनतु स्य °बन्धु- * भवयतु * |
| विवाहान् ज्ञातीन् सर्वान् अपि क्षापयतु ब्रह्मगवी क्षत्रियस्यापुनर्दीयमाना ॥६॥ | विवाति शाती सर्वम् |
| अवास्तुम् एनम् अस्वगम् अप्रजस करोत्य् अपरापरणो भवतु क्षीयते ॥७॥ | वास्वम् * * अप्रविमड * °परिणो * * |
| य एवं विदुषो ब्राह्मणस्य क्षत्रियो गाम् आदत्ते ॥८॥ | |
| क्षिप्र वै तस्याहनने गृध्रा× कुर्वत ऐलवम् ॥९॥ | कुवतैलबम |
| [क्षिप्रं वै] तस्यादहनं परि नृत्यन्ति केशिनी. । | |
| आघ्नाना× पाणिनोरसि कुर्वाणा× पापम् ऐलवम् ॥१०॥ | आघ्नराधाणा पाणिनोरस |
| [क्षिप्र वै] तस्य वास्तुषु गङ्कन कुर्वत ऽपि वृका ॥११॥ | प वृषात् |
| क्षिप्र वै तस्य पृच्छन्ति यत् तद् आसीद् इद नु ताद् [इति] ॥१२॥ ॥का° ६॥ | * * * * एतद् आमादत नु दा |

## १६ १४६

| | | |
|---|---|---|
| शौ ५१ | छिन्द्धय आ छिन्द्धि प्र छिन्द्धय् अपि क्षापयक्षापय ॥१॥ | * * * * ंद्धिवप * |
| शौ ५२ | आददानम् आङ्गिरसि ब्रह्मज्यम् अति दासय ॥२॥ | * आङ्गिरस दाशय |
| शौ ५३ | वैश्वदवी ह्य् उच्यसे कृत्या पूलपजाम् आवृता ॥३॥ | * ध्यु उच्यम |
| शौ ५४ | ओषन्ती समोषन्ती ब्रह्मणो वज्र[ ] ॥४॥ | |
| शौ ५५ | क्षुरपविर् मृत्युर् भूत्वा वि धाव त्वम् ॥५॥ | क्षुरपवरिर * * विभावमु |
| शौ ५६ | आ दत्से जिनतां वर्च इष्ट पूर्तं चाशिषः ॥६॥ | * दत्स्वे दनता वर्ग * * चाशिषा |
| शौ ५७ | आदाय जीत जीताय लोक अमुष्मिन् प्र यच्छसि ॥७॥ | यश्छनि |
| शौ ५९ | मेनिश् शरव्या भवाघाद् अघविषा भव ॥८॥ | मेन शव्या भवाप्याद् अकहविषा * |
| शौ ६१ | त्वया प्रवृक्ण रुजितम् अग्निर् दहतु दुष्कृतम् ॥९॥ | नया प्रवृक्णो रुचितम् |
| शौ ६०[१] | दैवपीयुम् अराधसम् ॥१०॥ | दैवपीयुनरादसम् |
| शौ ६२,६३ | वृश्च प्र वृश्च छिन्ध्य् अधिप्रछिन्धि कृन्तापि कृन्त पिंश प्र पिंश ॥११॥ | वृश्न * वृश्न कृन्तपि क्रिन्त * * * |
| | ओष सम् ओष दह प्र दह ब्रह्मज्य देव्य् अघ्न्य आ मूलाद् अनुसदह ॥१२॥ ॥का° ७॥ | नध्यु अघ्नया * * * * |

## १६ १४७

| | |
|---|---|
| यत् ते शीर्षणि दौर्भाग्य सक्वे ? केशेषु निहितं ललाटे । | * * शीर्षाणि * भक्ते |
| अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु ॥१॥ | |
| यत् ते भ्रुवोर् दौर्भाग्यं वाच्य् ओष्ठयो. । | * * अभ्रुर् |

[अयं तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥२॥
यत् ते दत्सु दौर्भाग्यं जिह्वाया चुबुक हितम् । उबुके
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥३॥
यत् त हन्वोर् दौर्भाग्य कण्ठ क्लोमसु विष्ठितम् । * * अह्नोर्
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥४॥
यत् ते स्कन्धषु ग्रीवासु दौर्भाग्य कीकसास्व् अनूक्ये । ग्रैवासु * कीकसासु नुक्ये
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥५॥
यत् त हन्वोर् दौर्भाग्यम् असयोर् उपपक्षयो । * * अह्नोर्
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥६॥
यत् त बाह्वोर् दौर्भाग्यम् अरत्न्योः कल्मुषीर् अनु । * * * * यमरत्न्योः * *
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥७॥
यत् ते हस्तयोर् दौर्भाग्य पाण्योर् अङ्गुलीर् अनु ।
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥८॥ ॥का° ८॥

१६ १४८

यत् त पृष्ठषु दौर्भाग्य जघने स्फिजोर् हितम् ।
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥१॥
यत् त उरसि दौर्भाग्य पार्श्वयोस् स्तनयोर् हितम् ।
[अयं तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥२॥
यत् ते हृदये दौर्भाग्य नाभ्या वक्षणा [अ]नु ।
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥३॥
यत् त प्रियन्ति ? दौर्भाग्य यद् वा यकनि वृक्कयो । वृक्णयो
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥४॥
यत् ते भसदि दौर्भाग्य यद् वा वशुक ? मुष्कयो । पुष्कयो
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥५॥
यत् ते वसति ? दौर्भाग्यम् ऊर्वोर् जानुनोर् हितम् ।
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥६॥
यत् त गुदास्व् अन्त्रेषु दौर्भाग्यम् उदर हितम् ।
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥७॥
यत् ते वस्तिषु दौर्भाग्य वनिष्ठौ प्लाशाव् आहितम् । वनिष्ठो * *
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥८॥
यत् ते श्रोण्योर् दौर्भाग्यम् अवचालूषयोर् ? हितम् ।
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥९॥
यत् त जङ्घयोर् दौर्भाग्य स्थूरयोः पार्श्वयोर् हितम् । पाष्ण्योर् *
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥१०॥ ॥का° ९॥

१६ १४९

यत् ते गुल्फयोर् दौर्भाग्य पादयोर् अङ्गुलीर् अनु । । यत् अनु (द्विरुक्तिः)
[अयं तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥१॥
यत् त किं चिद् दौर्भाग्यम् अङ्गेष्वङ्गषु प्रतिष्ठित यद् वा लोमसु विष्ठितम् । अङ्गमङ्गेषु
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥२॥
यत् त ऽक्षेषु दौर्भाग्य प्राहयाम् ? अधिदवन । अधि तेवने
[अयं तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥३॥
यत् त पार्श्वे दौर्भाग्य मासे ऽस्थिषु मज्जसु । * * पार्षि
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥४॥
यत् त पशुषु दौर्भाग्य कृष्याम् उषरे हितम् । उशने * । यात् ते हितम् (द्विरुक्ति)
[अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥५॥

| | | |
|---|---|---|
| | या ते ऽलक्ष्मीर् भ्रूणहत्याथो या ते अपुत्रता । | भ्रूणहत्याम् अथो * * * |
| | [अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥६॥ | |
| | या ते का च पापी लक्ष्मीर् अथो या ते अपत्यता ? । | लक्ष्मी पथो * * इपतिता |
| | [अय तद् विश्वभेषजो अपामार्गो ऽप लुम्पतु] ॥७॥ | |
| | यत् त ऽइष्ट पितृषधम् अथो या ते अपशुता । | °यत् ते इपशुता |
| | अय तद् विश्वभेषजो [अ]पामार्गो ऽप लुम्पतु ॥८॥ | अप * |
| | कण्ठलग्न ? महिमास्ति पूर्ण ? देवेभ्य× किल्बिष यद् बभूव । | कण्ठग्ग्ना |
| | इमास् तद् आप× प्र वहन्तु रिप्रं पुनातु मा शतधार पवित्रम् ॥९॥ | मा॰ा शतधारे * |
| | स्नाहि रिप्र शमलं च सर्व कृष्णे चले सादयित्वा पापम् । | |
| | हित्वावर्तिं निर्ऋतिं मृत्युपाशान् सूर्यज्योतिर् अभ्य् एष्य् अग्निम् ॥१०॥ | हित्वावर्त्ति |
| | यावन्तो ? [अ]स्मान् महतस् समुद्रान् मुच्यमानो अहस× पाप्मनश् च । | |
| | पुनर् मन× पुनर् आयुर् न आगन् मा मा दभन् पणयो यातुधाना ॥११॥ | * * * आयुन् नृ 'धानाम् |
| | अव रिप्रम् अनुक्ष्माद्य् ? अशास्तिम् अप्य् आत्मन । | * निप्रम् * अशस्तुम् |
| | वर्च आ धीयता मयि तेज [आ] धीयता मयि । | वचार्धीयताम धायाना * |
| | प्राणापानौ मा मा हासिष्ट सर्वम् आयुर् अशीय ॥१२॥ ॥का° १०॥ ॥अनु २१॥ | |

१६ १५०

| | | |
|---|---|---|
| पै ५ २ २,६ ११ १ | ब्रह्म जज्ञान [प्रथमं पुरस्ताद् वि सीमतस् सुरुचो वेन आव । | ब्रह्मा जज्ञानम् इत्य् एका |
| | [स बुध्न्या उपमा अस्य विष्ठास् सतश् च योनिम् असतश् च वि व ] ॥१॥ | |
| कौ ९७ ८ | ब्रह्म भ्राजद् उद् अगाद् अन्तरिक्षं दिव च ब्रह्मावाधृष्टामृतेन मृत्युम् । | ब्रह्मवाधृष्टा अमृतना * |
| | ब्रह्मोपद्रष्टा सुकृतस्य साक्षाद् ब्रह्मास्मद् अप हन्तु शमल तमश् च ॥२॥ | * * * ब्रह्मास्मिद् * * * तपश * |
| | प्रतीचीर् आयता[स्] स्थिता वितता[×] पश्यामहि समुद्रं सूर्यायाहितास् सुराणाम् अस्मै ॥३॥ | * * स्थत * पश्यामर्या * सूर्यायाहिता |
| शौ १९ ६५ | हरिस् सुपर्णो दिवम् आरुहो अर्चिषा ये त्वा दिप्सन्ति दिवम् उत्पतन्तम् । | * * * आरुरुहोम् * य उत्पतन्ताम |
| | अव तान् जहि [ह]रसा जातवेदो ऽबिभ्यद् उग्रो अर्चिषा दिवम् आ रोह सूर्य ॥४॥ | बिभ्यम् |
| शौ ६६ | अयोजाला [अ]सुरा मायिनो अयस्मयै× पाशैर् अङ्किनो य चरन्ति । | * * मायना अयस्म पाशैर् |
| | तांस् त रन्धयामि हरसा जातवेदस् सहस्रभृष्टिस् सपत्नान् प्रमृणन् याहि वज्र• ॥५॥ | * * रध्योमि हरम प्रमृण्यन् * |
| वे १४ १ | देवानाम् अधिपा एतु घर्म ऋतेन भ्रा[जन्न्] अमृत वि चष्टे । | * ाादिपा यतु * * त्वा अनृत * * |
| | हिरण्यवर्णो नभसो देव सूर्यो घर्मो भ्राजन् दिवो ऽन्तान् पर्य् ए[षि] विश्वत ॥६॥ | * * * मव न्तो * * |
| | वि द्योतन्ते विद्युतो अग्निजिह्वा हिरण्यवर्णा [अ]मृता [अ]प्स्व् अन्तस् समुद्रे । | |
| | रुद्रस्य क्षिपणोस् स्तनयित्नोर् विद्यु[त्] तस्य वैश्वानरस्य हति× परि णो वृणक्तु ॥७॥ | * मप ा मनयित्ना |
| | विद्युता भ्राजन् हृदं यात्य् अग्निर् व्याघ्रा [अ]प्सुपदो यत्र भीमा[ ] । | * भज हृ |
| | विष्णो× क्रमैस् स्तनयन्न् एति रुद्रो नुदन् शत्रून् विमृधो बाधमानो असपत्ना× प्रदिशो मे भवन्तु ॥८॥ | * * तवयन यति * नुरा शतृन् ममत्नः प्रतिशो * * |
| | अपो वसानस् समेत्य् अन्तरिक्ष दिव च समिद्धो अग्निर् दिव्यस् तपो ऽधात् । | * * समैन्य ि व्याम * |
| | वैश्वानरश् शमयश् शीतरूरे अपा सुपर्णो दिव एतु पृष्ठ ॥९॥ | दिव्य * * |
| वै १४ १ | वैश्वानरस् समुद्र पर्य् एति शुक्रो घर्मो भ्राजन् तेजसा रोचमान । | |
| | नुदन् शत्रून् प्रदहन् मे सपत्नान् आदित्यो द्याम् अध्य् अरुक्षद् विपश्चित् ॥१०॥ ॥का° १॥ | अनुरोश छतृन् * म * * याम * * विपश्यत् |

१६ १५१

| | | |
|---|---|---|
| पै १६ १५० ९[१] | वैश्वानरस् समेत्य् अन्तरिक्ष दिवं च समिद्धो ऽग्निर् दिव्यस् तपो ऽधात् । | वैश्वानर स्यैन न्तरिक्ष तमो जात् |
| °पै ६° | शिक्षन्त ? अस्मा [अ]भि पुण्वन्ति सोम ऋतन भ्राजन्न् अमृत वस्त तर्हि ॥१॥ | मिक्षन्त्व भ्राजम * * अर्हि |

| | | |
|---|---|---|
| | रञ्जयंते नीलयते शीतरूरे तन्वाव् अस्य भीम । | * नेलयत स्थीतरूरी तन्वो * * |
| | रूपाण्य् एति बहुधा वसानो ब्रह्मा[न्] कृण्वानस् तन्व[×] परावे ॥२॥ | कण्वानस् * * |
| ऋ १ १६४ ३ पै १६ ६७ ३ | पञ्चारे चक्रे परिवर्तमाने तस्मिन्न् आ तस्थुर् भुवनानि विश्वा । | * * परिवर्तमाने तस्मिन्न् |
| | तस्य नाक्षस् तप्यते भूरिभारस् सनाद् एव न छिद्यते सनाभि· ॥३॥ | * नक्षाम् सनाद् * नेश् छिछ्यते सनाभिः |
| | पञ्चभिस् तमस् तपत्व् एष एतत् सहस्रधामान्य् अधि तिष्ठन्त्य् एनम् । | * तपुत तपुव् |
| | सप्त त्वा सूर्य हरितो वहन्ति ब्रह्मणादित्य त्रिवृता सवने ॥४॥ | * * * * नहन्ति ब्रह्मणादित्यस् * सुसुवने |
| | वि द्योतते द्योतन आ द्योतते चाप्स्व् अन्तर् अमृतो घर्म उद्यन् । | * * द्योतता य द्योततेर् अस्त्व् * * घर्म दुग्धम् |
| | हन्ता वृत्रस्य हरिताम् अनीकम् अनाधृष्टास् तन्वस् सूर्यस्य ॥५॥ | अनादिष्टा तेनम् * |
| | घर्म× पश्चाद् उत घर्म× पुरस्ताद् अयोदंष्ट्राय द्विषतो ऽपि दध्म । | अयर्दष्टाय * * नध्म |
| वैता०सू० १४ १ | वैश्वानरश् च शीतरूरे वसानस् सपत्नान् मे द्विषतो हन्तु सर्वान् ॥६॥ | * * सयाशीतरूरे |
| | ऋतु[न्] ऋतुभिश् शमयति [ब्रह्मणैकवीरो घर्मश् शुचानस् समिधा समिद्ध । | * निर्ऋतुभिश् * |
| | [ब्रह्म त्वा तपति] ब्रह्मणा तेजसा च ॥७॥ | |
| | ब्रह्म जज्ञान प्रथमं समारभे तज् जायमान न बिभ्ये न तद् विदे । | त्वज् * * बिभे * * * |
| | न[द्] रोहमाणं ८ वितर्या ह ततस्य नाड्या तता विततास् ततातता ? ॥८॥ | |
| | अमर्त्येजा नस् स्वराज्यभारो गर्ये जजान स्वजासु भर्ता । | अमर्त्योजा * स्वराज्यभार * जजानस् स्वजसु * |
| वे २५ ७-२४ | प्रजापति× प्रजाभिस् संविदानस् त्रीणि ज्योतींषि दधते चापाक ॥९॥ | तदाते चपाक- |
| शौ १० ८ १३[१] | प्रजापतिश् चरति गर्भे अन्तस् स्वजायमानो बहुधा वि जायते । | * चरमि |
| | तस्य पदम् अभि पश्यन्ति वेधसस् तस्मिन्न् आर्पिता भुवनानि विश्वा ॥१०॥ ॥का॰२॥ | * * * * वेदशस |

१६ १५२

| | | |
|---|---|---|
| शौ १० ८ ३४ | यस्मिन् देवा× पितरो मनुष्या[श् चा]रा नाभाव् इव श्रिता । | * देवान् स्वत. |
| | अपां त्वा पुष्पं पृच्छामि यत्र तन् मायया हितम् ॥१॥ | अपन् त पाया * |
| | यत्रापां पुष्पं निहितं मायाभिर् हितं गुहा न । | यत्राप * * मायाति हत * र |
| [१]शौ १० ७ २४ । [४]शौ १० ८ २०[४] | यो वै तद् विद्यात् प्रत्यक्ष स विद्याद् ब्राह्मण महत् ॥२॥ | * * तत्त |
| | मणिस् तु सूत्रे निहितस् स्वर्यद् ऊर्ध्व[स्] श्रियं विशतु प्रजानन् । | * * सूत्रो निहतम |
| | स पुमान् पुसो अनयन् ८ ततन सर्वाम् अदन्तां अदछतु सधेष ? ॥३॥ | |
| | सर्वा रात्रि सम् ओषत्व् आदित्यो जातवेदसा । | * रात्रिय भद्दोषित्वादित्या * |
| | अग्नेर् अधि दिवम् आरोहम् आयुषा स पुनातु मां वर्चसा स सृजतु माम् ॥४॥ | पुनन्तु मा * * सजातु |
| | घर्मस् साहस्रस् समिधा समिद्धो ऽसपत्ना× प्रदिशो मे भवन्तु । | * महस्र समिधास् * सपत्न- |
| | सपत्नान् सर्वान् मे सूर्यो हन्तु वैश्वानरो हरि[.] । | सूर्य |
| वे १४ ७ | घर्मस् तप्त× प्र दहतु भ्रातृव्यान् द्विषतो वृषा ॥५॥ | * तपतु वृषा |
| | उद्यन् मे शुक्र आदित्यो विमृधो वच्मि सूर्य[ः] । | * * शुक्रादित्यो |
| | वैश्वानर× प्र दहतु भ्रातृव्यान् द्विषतो मम ॥६॥ | |
| | आवन्ताश् ? शत्रून् आदित्य विमृधो हन्मि रक्षसा । | * शतृन् |
| | शुक्र सुवर्ण हरिं ब्रह्म भ्राजिष्ठ ज्योतिर् दिवम् आ ततान ॥७॥ | * * * * भ्राजस्त |
| | हरिस् सुवर्णस् सृजत्व् अभयकरो हिरण्यवर्णो दुरिता पाशु ? । | * * सृजतु भयकरो |
| वे १४ ९ | सपत्नान् सर्वान् मे सूर्यो हन्तु वैश्वानरो गृह्णन् ॥८॥ | * * * सूर्य एतु * गृहम् |
| | महान्तम् अर्थ परिसर्पैत्य् अहोरात्र विततश् शुक्र उद्यन् । | महन्तम् * सर्पैत्य् * * छुक्र उद्यम् |
| | सपत्नान् सर्वान् मे सूर्यो हन्तु वैश्वानरो गृह्णन् ॥९॥ | सूर्य एतु * गृहम् |
| पै १० १० ७ | उद्यन्न् अद्य मित्रमह[स् सपत्नान् मे अव जहि । | उद्यन्न् अद्य मित्रमह इत्य् एका |
| | [दिव एनान् रश्मिभिस् सह रात्रीणां तमसा वधीस् त यन्त्व् अधमं तम ] ॥१०॥ | |
| | तेजस् तपांसि मुखतो बिभर्म्य् आनन्द भूत महसि प्रतिष्ठाम् । | तेजास् त्वपांसि * बिभार्म्य् प्रतितिष्ठाम् |
| | पर्यूहमाणश् श्रय तेषु सर्वतो अमोघ सत्य यश उद्यत त ॥११॥ ॥का ३॥ | |

१६ १५३

| | | |
|---|---|---|
| शौ ११ ५ १ | ब्रह्मचारीष्णंश् चरति रोदसी उभे अस्मिन् देवास् सुमनसो भवन्तु । | ब्रह्मचारीष्णोश् * * * यस्मिन्मिन् |

| | | |
|---|---|---|
| | स दाधार पृथिवीं द्याम् उतामूं स आचार्यं तपसा बिभर्ति ॥१॥ | सम * * * * साचार्यं उपसा * |
| शौ ३ | आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भम् अन्तः । | * उपनेमाणो |
| | त रात्रीस् तिस्र उदरे बिभर्ति त जात द्रष्टुम् अभिसंयन्तु देवा. ॥२॥ | स्व * * * * स्व * त्रिष्ठुम् अभीसीयन्तु देव- |
| शौ २ | ब्रह्मचारिणं पितरो मनुष्या देवजना गन्धर्वा अनुसंयन्तु सर्वे । | देवाजना गन्धर्वानुमन्यन्तु * |
| | त्रयस्त्रिंशत् त्रिशताष् षट्सहस्रास् सर्वान् स देवांस् तपसा बिभर्ति ॥३॥ | त्रयस्त्रिंशत त्रिशता * सहस्रान् |
| शौ ४ | [इ]य समित् पृथिवी द्यौ[र्] द्वितीयोतान्तरिक्षं समिधा पृणाति । | ममिता पृणासि |
| | ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस् तपसा बिभर्ति ॥४॥ | । ओं श्रमेण लोकास् तपसा बिभर्ति |
| शौ ५ | पूर्वो जातो ब्रह्मणो ब्रह्मचारी घर्मं वसानस् तपसोद् अतिष्ठत् । | ओं पूर्वो तपसोधि तिष्ठत् |
| | तस्माज् जात ब्राह्मण ब्रह्म ज्येष्ठ देवाश् च सर्वे अमृतेन साकम् ॥५॥ | |
| शौ ६ | ब्रह्मचार्य् [एति] समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रु । | ब्रह्मचारी कार्ष्णि * * * |
| | स सद्य एति पूर्वाद् अपर समुद्र लोकान् संसद्य मुहुर् आचरिक्रत् ॥६॥ | * सद्येत् पूवाद् * * लोका ससत्यसि हरा |
| शौ ७ | ब्रह्मचारी जनयन् ब्रह्मापो लोक प्रजापतिं परमेष्ठिन विराजम् । | लोका प्रजापती * निराजद [जरिक्रत् |
| | गर्भो भूत्वामृतस्य योनाव् इन्द्रो भूत्वासुरांस् ततर्ह ॥७॥ | * * योनाम् * भूत्वामृतास तर्हे |
| शौ ९ | इमां भूमिं पृथिवीं ब्रह्मचारी भिक्षाम् [आ] जभार प्रथमो दिव च । | चभार प्रशमो * * |
| | ते ब्रह्म कृत्वा समिधाव् उपास्ते तयोर् आर्पिता भुवनानि विश्वा ॥८॥ | त * * समिधासमिधा उपासत उतयोर् अर्पिता * * |
| शौ ८ | आचार्यस् ततक्ष नभसी उभे [इमे] उर्वी गभीरे पृथिवीं दिव च । | * तदक्ष |
| | ते ब्रह्मचारी तपसाभि रक्षतु तयोर् देवास् संमनसो भवन्ति ॥९॥ | तो |
| शौ १० | अर्वाग् अन्यः परो अन्यो गुहा [निधी] निहितौ ब्राह्मणस्य । | * * परान्या * निहतो ब्रह्मणस्य |
| | तौ ब्रह्मचारी तपसाभि रक्षतु तत् केवल कृणुते ब्रह्म विद्वान् ॥१०॥ | निधाम् |
| | ॥का° ४॥ | |

१६ १५४

| | | |
|---|---|---|
| शौ ११ ५ ११ | अर्वाग् अन्यो दिवस् पृष्ठाद् इतो ऽन्यः पृथिव्या [अ]ग्नी समेतो नभसी अन्तरेमे । | शमयतो * |
| | तयो[श्] श्रयन्ते रश्मयो अधि दृढास् तान् आ तिष्ठतु तपसा ब्रह्मचारी ॥१॥ | * स्रयन्ते * अति * स्तान् |
| शौ १२ | अभिक्रन्दन् स्तनयन्न् अरुणश् शितिङ्गो बृहच् छेपो अनु भूमौ जभार । | * इरुणश् छातिंगो * * न भोनो * |
| | ब्रह्मचारी सिञ्चतु सानौ रेतः पृथिव्या तेन जीवन्ति प्रदिशश् चतस्र ॥२॥ | * * माना |
| शौ १४ | पर्जन्यो मृत्युर् वरुणस् सोम ओषधयः पय । | |
| | जीमूता [आ]सन् सत्वानस् तैर् इद स्वर् आभरम् ॥३॥ | * म * * अदा * * |
| शौ १३ | अग्नौ सूर्ये चन्द्रमसि मातरिश्वन् ब्रह्मचार्य् अप्सु समिधम् आ दधाति । | अग्नौ ददामि |
| | तेषाम् अर्चींषि पृथग् अभ्र अन्तस् तेषाम् आज्य पुरुषो वर्षम् अश्व[.] ॥४॥ | * ऋत्युषि प्रति गर्भान् उन्तस * * * वर्षम् * |
| शौ १५ | अमा घृतं कृणुत कवलम् आचार्यो भूत्वा वरुणो [य]द्यद् ऐच्छत् प्रजापतौ । | आमा दिद वरुणो * ऐत्स |
| | स ब्रह्मचारी [प्रायच्छत् स्वान् मित्रो अध्य् आत्मन ॥५॥ | |
| शौ १६ | [आचार्यो ब्रह्मचारी] ब्रह्मचारी प्रजापति । | |
| | प्रजापतिर् वि राजति विराड् इन्द्रो ऽभवद् वशी ॥६॥ | * * * विराट * भरद् * |
| शौ १७ | ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति । | रक्षेते |
| | आचार्यो ब्रह्मचर्येण ब्रह्मचारिणम् इच्छते ॥७॥ | इइछति |
| शौ १८ | ब्रह्मचर्येण कन्या युवान विन्दते पतिम् । | विकते * |
| | अनड्वान् ब्रह्मचर्येणाश्वो घास जिहीर्षति ॥८॥ | अनट्वाह ब्रह्मचयणाश्वे * जहिरुषति |
| शौ १९ | ब्रह्मचर्येण तपसा देवा मृत्युम् उपाजयन् । | उपाजयम् |
| | इन्द्रो ह ब्रह्मचर्येणामृत स्वर् आभरत् ॥९॥ | |
| शौ २० | ओषधयो भूतभव्यम् अहोरात्रे वनस्पतय । | * भूताभव्यम् |
| | संवत्सरस् सह ऋतुभिस् ते जाता ब्रह्मचारिण. ॥१०॥ ॥का° ५॥ | मवत्सरस्य हतुभिम् * * ब्रह्मचारिणा |

१६ १५५

| | | |
|---|---|---|
| शौ ११ ५ २१ | पार्थिवा दिव्याः पशव आरण्या ग्राम्याश् च ये । | |
| | अपक्षा[ः] पक्षिणश् च ये ते जाता ब्रह्मचारिणः ॥१॥ | °चारिणा |

| | | |
|---|---|---|
| शौ २२ | पृथक् सर्वे प्राजापत्या[×] प्राणां आत्मसु बिभ्रति । | आतुमसि बिभ्रती |
| | सर्वास् तान् ब्रह्म रक्षति ब्रह्मचारिण्य् आभृतम् ॥२॥ | सवास् त्वा आभ्रत |
| शौ २४[११] | ब्रह्मचारी ब्रह्म भ्राजद् बिभर्त्य् अस्मिन् देवा अधि विश्वे समोता॰ । | समेता |
| शौ २६[१४] | स स्नातो बभ्रु× पिङ्गल× पृथिव्यां बहु रोचते ॥३॥ | |
| गो ब्रा १ २ ७ शौ २३[११] | देवानाम् एतत् पुरुहूतम् अनभ्यारूढं चरति रोचमानम् । | मनुष्यारूढ * * |
| | तस्मिन् सर्वे पशवस् तत्र यज्ञास् तस्मिन्न् अन्न सह देवताभि ॥४॥ | अन * * |
| शौ २४[१४],२५ | प्राणापानौ जनयन्न् आद् व्यान चक्षुश् श्रोत्र जनयन् ब्रह्म मेधाम् । | * * या |
| | वाच श्रेष्ठा यशो ऽस्मासु धत्तम्य् अथो रेतो लोहितम् उदरम् ॥५॥ | अर्थो * * * |
| शौ २६[११] | तानि कल्पद् ब्रह्मचारी सलिलस्य पृष्ठे तपो ऽतिष्ठत् तप्यमानस् समुद्र ॥६॥ ॥का॰ ६॥ ॥अनु॰ २ २॥ | * कल्पम् ॥ ॥ ओं तपो तिष्ठत तप्यमान-स्समुद्रे ॥ ॥ प्रतिकाण्डे पश्च पद द्वितीय द्वितीय लिखत् २ ॥न तु पूर्व लिखित्वा ॥ अवश्य जपेत् ॥ ॥ |

॥ इत्यथर्ववेदे पैप्पलादशाखाया षोडश- काण्डस् समाप्त ॥

इत्यथर्वणिके पैप्पलादयश् शाखाया षोडश-[काण्डस् समाप्त ॥ ॥

१७ १

| | | |
|---|---|---|
| शौ १२ १ १ | सत्यं बृहद् ऋतम् उग्र दीक्षा तपो ब्रह्म यज्ञ[×] पृथिवीं धारयन्ति । | ओं अथ सप्तादशो काण्ड लिख्यत्वा ॥ ॥ ओं नमो गणेशाय । ओं नमो ज्वालाभगवत्यै । ओं नमस्तिलोत्तमायै ॥ ओं सत्य |
| | सा नो भूतस्य भव्यस्य पत्न्य् [उरु] लोक पृथिवी न× कृणोतु ॥१॥ | * * भूतुस्य कव्यस्य पति |
| शौ २ | असबाध बध्यतो मानवेषु यस्या उद्वत× प्रवतस् सम बहु । | अस्या * * म बभून् |
| | नानावीर्या ओषधीर् या बिभर्ति पृथिवी न× प्रथता राध्यता न ॥२॥ | ...राध्यता ह्रास |
| शौ ३[१] | यस्यां समुद्र उत सिन्धुर् आपो यस्या देवा [अ]मृतम् अन्वविन्दन् । | |
| शौ ४[३४] | या बिभर्ति बहुधा प्राणद् एजत् सा नो भूमिर् गोष्व् अश्वेषु पिन्वे ? कृणोतु ॥३॥ | प्राणिन् एजक्क नो * * * * |
| शौ ५[११] | यस्या पूर्वे पूर्वजना विचक्रिरे यस्या देवा असुरान् अभ्यवर्तयन् । | * * * नि॰ यस्ता |
| शौ ३[१४] | यस्याम् इद जीवति ? विश्वम् एजत् सा नो भूमि× पूर्वपेय दधातु ॥४॥ | ऐजत् पूर्वपेय्ये * |
| शौ ४[११] | यस्या चतस्र× प्रदिश× पृथिव्या यस्याम अन्न कृष्टयस् सबभूवु॰ । | गृष्टयस * |
| शौ ५[१४] | गवाम् अश्वाना वयसश् च विष्ठा भगं वर्च× पृथिवी नो दधातु ॥५॥ | * * वयमस्य विष्ठा |
| शौ ६ | विश्वभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी । | * वसुजना |
| | वैश्वानर बिभ्रती भूमिर् अग्निम् इन्द्रऋषभा द्रविणे नो दधातु ॥६॥ | * * * अग्निर् मिदु . |
| शौ ९ | यस्याम् आप× परिचरास् समानीर् अहोरात्र अ[प्र]माद क्षरन्ति । | यस्यान् * ॰चरात् * ॰रात्र |
| | सा नो भूमिर् भूरिधारा पयो दुहाम् अथो उक्षतु वर्चसा ॥७॥ | * * * ॰धाना * * अथा अक्षतु * |
| शौ ७ | या रक्षन्त्य् [अ]स्वप्ना विश्वदानी देवा भूमिं पृथिवीम् अप्रमादम् । | * रक्षन्तु स्वपुना अप्रमानम् |
| | सा नो मधु प्रिय दुहाम् अथो उक्षतु वर्चसा ॥८॥ | अक्षतु * |
| शौ ८ | यार्णवे अधि सलिलम् अग्र आसीद् या मायाभिर् अन्वचरन् मनीषिण । | उग्र * यान् मायामभिर् अन्दजरन् * |
| | यस्या हृदय परम व्योमन् सत्यनावृतम् [अ]मृत पृथिव्या[ ] । | मत्येनावतु * * |
| | सा नो भूमिस् त्विषिं बल राष्ट्र दधातूत्तमे ॥९॥ | * नो नो भूमि स्वस्तिवषि बाल * * |
| शौ १०[११] | याम् अश्विनाव् अमिमाता विष्णुर् यस्यां विचक्रमे ॥१०॥ ॥का॰ १॥ | * अश्विनाम् इममाता |

शौ १२ १ १०[३]–१०

१७ २

| | | |
|---|---|---|
| | इन्द्रो या चक्र आत्मने ऽनमित्रां शचीपति । | * * चक्रात्मने नमित्रांश् * |
| | सा नो भूमिर् वि सृजता माता पुत्राय न× पय ॥१॥ | |
| | गिरयस् त पर्वता हिमवन्तो अरण्य ते पृथिवि स्योनम् अस्तु । | गिरिस् . अस्तुनः |

बभ्रु कृष्णां लोहिनीं विश्वरूपां ध्रुवां भूमिं पृथिवीम् इन्द्रगुप्ताम् ।
अजीतो अहतो अक्षतो अध्य् अष्ठा पृथिवीम् अहम् ॥२॥    अजीहतो हतो * अद्धि ष्ठा * *
यत् त मध्यं पृथिवि यच् च नभ्य यास् त ऊर्जस् तन्वस् संबभूवु. ।    * * * पृथिवी * * नाथा यास तद् * * *
तासु नो धेह्य् अभि न× पवस्व माता भूमि× पुत्रो ऽहं पृथिव्या. ।    नासि॒ पवस्वा
पर्जन्य× पिता स उ न× पिपर्तु ॥३॥    * * मौ * पिबन्तु
यस्यां वेदिं परिगृह्णन्तु भूम्यां यस्यां यज्ञ तन्वते विश्वकर्माण ।
यस्यां मीयन्ते स्वरव× पृथिव्याम् ऊर्ध्वाश् शुक्रा आहुत्या× पुरस्तात् ।    छुक्रा हुत्या *
सा नो भूमिर् वर्धयातु वर्धमाना ॥४॥    * * भूमि वधयातु वर्धयातु वधमानाम्
यो नो द्वेषत् पृथिवि य× पृतन्याद् यो ऽभिमन्याते मनसा वधन ।    * * * पृथिवी यत् धनेन
त नो भूमे रन्धय पूर्वकृत्वरि ॥५॥    तन् * भूय * °कृत्वने
त्वज् जातास् त्वयि चरन्तु मर्त्यास् त्व बिभर्षि द्विपदश् चतुष्पदः ।    त्व * र्वी जरन्तु
तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिर् अमृत मर्त्येभ्य उद्यन् सूर्यो रश्मिभिर् आतनोति ॥६॥    तश्म पृथिवा
ता न× प्रजास् स दुह्रता समग्रा वाचो मधु पृथिवि धेहि मह्यम् ॥७॥    * * प्रजात् मिन् धूरता * * मपु * * महीयम्
विश्वस्व मातरम् ओषधीना ध्रुवा भूमिं पृथिवीं धर्मणा धृताम् ।    विश्वस्म
शिवा स्योनाम् अनु चरेम विश्वहा ॥८॥
महत् सधस्थ महती बभूविथ महान् वेग एजथुर् वेपथुष् टे ।    * सधस्त * बभूयथ * देवेभृयुर् गोपतिष्टे
महास् त्वेन्द्रो रक्षतु वीर्येण ।    महस्म तेश्न्द्रो * *
सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि ॥९॥
[अग्निर् भूम्याम् ओषधीष्व् अग्निम् आपो बिभ्रत्य् अग्निर् अश्मसु । ]
अग्निर् अन्त× पुरुषेषु गोष्व् अश्वे[ष्व् अ]ग्नय. ॥१०॥ ॥का° २॥

शौ १२ १ २०–३०,४४

## १७ ३

अग्निर् दिव आ तपत्य् अग्नेर् देवस्योर्व् अन्तरिक्षम् ।    * दिश्वा तपत्य्
अग्नि मर्तास इन्धते हव्यवाहं घृतप्रियम् ॥१॥
अग्निवासा× पृथिव्य् असितज्ञूस् त्विषीवन्त संशित मा कृणोतु ॥२॥    अग्निवास * असतज्ञस * शमितु * *
भूम्या देवेभ्यो जुह्वति यज्ञं हव्यम् अरङ्कृतम् ।    यज्ञा
भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्या. ।    स्वधयान्दनु मर्त्या
सा नो भूमि× प्राणम् आयुर् दधातु जरदष्टिं मा पृथिवी कृणोतु ॥३॥
यस् त गन्ध× पृथिवि संबभूव य बिभ्रत्य् ओषधयो यम् आप. ।    यप् आष
य गन्धर्वा अप्सरसश् च भेजिर यस् त गाम् अश्वम् अर्हति ।
तनास्मान् सुरभीन् कृणु मा नो द्विक्षतु कश् चन ॥४॥    तयास्मान् सुरभीः द्वक्षतु
यस् त गन्ध× पुष्करम् आविवेश य संजभ्रुस् सूर्याया विवाहे ।    मचभ्रम * *
अमर्त्या× पृथिवि गन्धम् अग्र तनास्मान् सुरभीन् कृणु मा नो द्विक्षतु कश् चन ॥५॥    अमत्य॰ सुरभी॰ द्वक्षतु
यस् ते भूम पुरुषेषु स्त्रीषु पुंसु भगो रुचि ।    * * भाम * * पुसु * रुचुर्
यो वधूषु यो गोष्व् अश्वेषु यो मृगषूत हस्तिषु ।
कन्याया वर्चो यद् भूम तेनास्मा अभि सं सृज मा नो द्विक्षतु कश् चन ॥६॥    * वर्चा * भौमि तेनास्मा द्वक्षतु *
शिला भूमिर् अश्मा पांसुर् या भूमि[स्] संधृता धृता ।    * * अस्मा पास्वर * * स्नृता *
[ तस्यै हिरण्यवक्षस पृथिव्या अकर नम ] ॥७॥
यस्यां वृक्षा वानस्पत्या ध्रुवास् तिष्ठन्तु विश्वहा ।
भूमिं हिरण्यवक्षस धृताम् अच्छावदामसि ॥८॥    भूम्यां वक्षनि
उदीराणा उतासीनास् तिष्ठन्त× प्रक्रामन्त ।    तिष्ठन्तु प्रक्रामतः
पद्भ्या दक्षिणसव्याभ्या मा व्यथिष्महि भूम्याम् ॥९॥    * °सव्याभ्यम * वनिष्मे *
विमृग्वरीं पृथिवीम् आ वदामि क्षमां भूमिं ब्रह्मणा वावृधान ।    विमर्ग्वेय
ऊर्जं पुष्टिं बिभ्रतीम् अन्नभाग घृत त्वाभि नि षीदामि भूम ॥१०॥    * * * अन्वभाग * * नु * भौमे
शौ कोशेषु नाना स्वेदुः, स्येदुः, सेदु    शुद्धा म आपस् तन्वे क्षरन्ति यो मे सेदुर् ? अप्रिय त नि [द]ध्म. ।    * मापस् तन्व रक्षन्ति * * सेहार् * * वनि *
पवित्रेण पृथिवि मोत् पुनामि ॥११॥    * पृथिवी मुत् *

| | | |
|---|---|---|
| | निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु न । | निधिश मनियो * * दधातु * |
| | वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना ॥१२॥ ॥का° ३॥ | सुमनस्यमाना |

## १७४

| | | |
|---|---|---|
| शौ १२.१.३१ | यास् ते प्राची[×] प्रदिशो या उदीचीर् यास् ते भूमे अधराद् याश् च पश्चात् । | भौमे दधराद् * * |
| | स्योनास् ता मह्य चरते भवन्तु मा नि पप्तं भुवने शिश्रियाण. ॥१॥ | * स्वा * तरते * * न पप्ति * शुश्रियाणे |
| शौ ३२ | मा मा पश्चान् मा पुरस्तान् नुदिष्ठा [मोत्तराद् अधराद् उत] । | सा * * * पुरस्ताद् अधिष्ठा |
| | स्वस्ति भूमे मे कृणु वरीयो यावया वध मा विदन् परिपन्थिन. ॥२॥ | * भौमे * * वार्यो विध * |
| शौ ३३ | यावत् ते [अ]भि विपश्यामि भूमे सूर्येण मेदिना । | * * * वपश्यामि भौमे |
| | तावन् मे चक्षुर् मा मेष्टोत्तरामुत्तरां समाम् ॥३॥ | * * चक्षुषूत्तरमुत्तरा * |
| शौ ३५ | यत् ते भूमे विखनाम्य् ओष तद् अपि रोहतु । | * * भौमे विखना योष तत् पु * |
| | मा ते मर्म विमृग्वरि मा ते हृदयम् अर्पिपम् ॥४॥ | * * मन्म त्रिमर्ग्वरि |
| शौ ३४ | यच् छयान× पर्यावर्ते दक्षिण सव्यम् अपि भूमे पार्श्वम् । | भौमे * |
| | उत्तानास् त्वा प्रतीचीं पृष्ट्या यद् अधिशेमहे । | उत्तानस् * * पृष्टवा अद्दशेमहे |
| | मा हिंसीस तत्र नो भूमे सर्वस्य प्रतिशीवरि ॥५॥ | भौमे * * |
| शौ ३६ | ग्रीष्मस् ते भूमे वर्षाणि शरद् धेमन्तश् शिशिरो वसन्त. । | * * भौमे |
| | ऋतवस् ते विहिता हायना [अ]होरात्रे पृथिवि नो दुहाताम् ॥६॥ | * * वीत |
| शौ ३७ विजमाना | याप सर्प यतमाना ? विमृग्वरी यस्याम् आसन्न् अग्नयो ऽप्स्व् अन्त. । | यआपस मपन् * विमर्ग्वरि यास्याम्.. |
| | परा दस्यून् ददती देवपीयून् इन्द्र वृणाना पृथिवी न वृत्रम् । | * * दधता °पार्यून् |
| | शक्राय दध्रे वृषभाय वृष्णे ॥७॥ | |
| शौ ४० | सा नो भूमि[र्] आ दिशातु यद् धन कामयामहे । | |
| | भगो अनुप्रयुङ्क्ताम् इन्द्रो यातु पुरोगव ॥८॥ | * नपुयुक्ताम् |
| शौ ३८[३-५] | ब्रह्माणो यस्याम् अर्चन्त्य् ऋग्भिस् साम्ना यजुर्विद । | |
| | युज्यन्ते [य]स्याम् ऋत्विजस् सोमम् इन्द्राय पातवे । | * * ऋत्यवस |
| | सा नो भूमि[र्] दक्षिणाया सुशेवा यज्ञ दधातु सुमनस्यमाना ॥९॥ | सुशवा |
| शौ ३९ | यस्यां पूर्वे भूतकृत ऋषयो गा उद् आनृचु । | आनात् |
| | सप्त सत्त्रेण वेधसो यज्ञेन पयसा सह । | * * वेदसो |
| | सा न× पशून् विश्वरूपान् दधातु जरदष्टिं मा पृथिवी कृणोतु ॥१०॥ | |
| शौ ४२ | यस्याम् अन्न व्रीहियवा यत्रमा× पञ्च कृष्टय । | * * व्रीहयवौ गृष्टय |
| | भूम्यै पर्जन्यपत्न्यै नमो ऽस्तु वर्षमेदसे ॥११॥ ॥का° ४॥ | भूमी °पत्नी * * °मेधमे |

## १७५

| | | |
|---|---|---|
| शौ १२.१.४१ | यस्या गायन्ति नृत्यन्ति जना मर्त्या व्यैलबा. । | ब्रैलबा |
| | युध्यन्ते [य]स्याम् आक्रन्दो यस्यां वदतु दुन्दुभि । | युज्यन्ते |
| | सा नो भूमि× प्र णुदताम् सपत्नान् यो नो द्वेष्टय् अधर त कृणोतु ॥१॥ | * * * * दधना मपत्नीं * * दुष्टय |
| शौ ४३ | यस्या पुरो देवकृता× क्षेत्रे यस्या विकुर्वते । | |
| | प्रजापति× पृथिवीं विश्वगर्भाम् आशामाशा रण्या न× कृणोतु ॥२॥ | * * * आशामामा रण्यान् निष्टणातु |
| शौ ४५ | जन बिभ्रती बहुधा [विवा]चस नानाधर्माण पृथिवी यथौकसम् । | जनय यतौकमम् |
| | सहस्रं धारा द्रविणस्य नो दुहां ध्रुवव धेनुर् अनपस्फुरन्ती ॥३॥ | महसन् * * * * दुहव |
| शौ ४६ | यस् त सर्पो वृश्चिकस् तृष्टदंशमा हेमन्तजब्धो भृमलो गुहा शये । | वृश्चकस् * °लब्धा भ्रमलो * शे |
| | क्रिमिर् जिन्वत् पृथिवि प्रावृषि यद् एजति तन् नस् सर्पन् मोप सृपद् यच् छिव तेन नो मृड ॥४॥ | क्रमिन् लिस पृथिव्ये प्रावर्षी * * त * मर्पै * सृपद्य छिवस्तेनन् * * |
| शौ ४७ | ये त पन्थानो बहुधा जनायना रथस्य वर्त्मानसश् च यातवे । | जनायवा * वर्णमनमश् * * |
| | यैभिश् चरन्त्य् उभये भद्रपापास् त पन्थान जयेमानमित्रम् अतस्कर [यच् छिव तेन नो मृड] ॥५॥ | * चरत्य * °पापस उतस्करम् |
| शौ ४८ | सर्पं बिभ्रती सुरभिर् भद्रपापस्य निधन तितिक्षु । | * * * भद्र पापाश्च * तदिक्षु |

| | | |
|---|---|---|
| | सूकरेण पृथिवी सविदाना वराहाय वि जिहीते मृगाय ॥६॥ | * पृथिवि सविधाना * * जीयत * |
| शौ ४९ | ये त आरण्या× पशवो मृगा वने हितास् सिंहा व्याघ्रा× पुरुषादश् चरन्ति । | य तारण्या॰ पुरुषादुश |
| | उलं वृक पृथिवि दुच्छुनाम् इत ऋक्षीकां रक्षो ऽप बाधयास्मत् ॥७॥ | * * पृथिवो * पत रक्षीका * * बाधामत् |
| शौ ५० | ये गन्धर्वा [अ]प्सरसो ये चारायाः किमीदिन॰ । | |
| | पिशाचान् सर्वा रक्षांसि तान् अस्मद् भूमे यावय ॥८॥ | पिशाचन् अस्मन् भौमे यावयः |
| शौ ५१ | यां द्विपद× पक्षिणस् सपतन्ति हंसास् सुपर्णाश् शकुना वयांसि । | * * * सपदन्ति |
| | यस्यां वात [ई]यते मातरिश्वा रजांसि कृण्वंश् च्यावयंश् च वृक्षा[न्] । | रर्जांसि कृण्वाश चावयाश * * |
| | वातस्य प्रवाम् [उपवाम्] अनु वात्य् अर्चि ॥९॥ | अर्चिषे |
| शौ ५२ | यस्यां कृष्णम् अरुण च सभृते [अ]होरात्रे विहिते भूम्याम् अधि । | * गृष्टमगृष्टम् अरुण * * * विहते * * |
| | वर्षेण भूमि× पृथिवी वृतावृता सा नो दधातु भद्रया प्रि[ये] धाम्नि-धाम्नि ॥१०॥ ॥का॰५॥ | * * * वृतावृधा म |
| | | * ॥१०॥ फइच ५ ॥ |

१७ ६

| | | |
|---|---|---|
| शौ १२ १ ५३ | द्यौश् च म इद पृथिवी चान्तरिक्ष च मे व्यच । | * * मेद |
| | अग्निस् सूर्य आपो मेधां विश्वे देवाश् च स ददु ॥१॥ | * सूर्याये मेधा दधौ |
| शौ ५४ | अहम् अस्मि सहमान उत्तरो नाम भूम्याम् । | * * महमानाम् |
| | अभीषाड् अस्मि विश्वाषाड् आशामाशां विषासहि[ ] ॥२॥ | अभाषद् उस्मि विश्वषान् आशामामा * |
| शौ ५५ | यद् अदो देवि प्रथमाना पुरस्ताद् देवैस् सृष्टा व्यसर्पो महित्वम् । | × × दो * * * देवी * विसल्पो * |
| | आ त्वा सुभूतम् अविशत् तदानीम् अकल्पयथा[×] प्रदिशश् चतस्र ॥३॥ | * वाम् अभूतम् अविम त्वदाना * * * |
| शौ ५६ | ये ग्रामा यान्य् अरण्यानि यास् सभा अधि भूम्याम् । | * ग्राम्या * * यात् ममाद् * |
| | तेष्व् अह देवि पृथिवि भ्यास ? मधुमद् वच ॥४॥ | * * * पृथ्विवि * मधुमत्वन |
| शौ ५८ | यद् वदामि मधुमत् तद् वदामि [य]द् ईक्षे तद् वनन्तु माम् । | वदन्तु * |
| | त्विषीमान् अस्मि जूतिमान् अवान्यान् हन्मि दोधत[ ] ॥५॥ | * * उमतिमान् अवान्यानि * * |
| शौ ५७ | अश्व इव रजो दुधुवे तान् जनान् आक्षियन् पृथिवीं याद् अजायत । | अश्वाव रदा ददुहे त जनिमा क्षिया पृथ्विम् |
| | मन्द्राग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिर् ओषधीनाम् ॥६॥ | मन्दार्पार भूवनस्य [आद् * |
| शौ ५९ | शन्तिवा सुरभि[स्] स्योना कीलालोध्नी पयस्वती । | मान्तिवा * * कालालामध्नी * |
| | भूमिर् नो ऽधि ब्रवीतु पृथिवी पयसा सह ॥७॥ | |
| शौ ६३ | भूमे मातर् नि धहि मा भद्रया सुप्रतिष्ठितम् । | भूमि |
| | सविदाना दिवा त्व श्रियां मा धहि भूत्याम् ॥८॥ | रमा * * |
| शौ ६० | याम् अन्वैच्छद् धविषा विश्वकर्मा यस्याम् आसन्न् अग्नयो ऽप्स्व् अन्त । | * अन्वैदछद् |
| | भुजिष्य पात्र निहित गुहा यद् आविर् भोग अभवन् मातृमद्भ्य ॥९॥ | * पात्र * * हैर् * भोर् अभवर् मात्रमद्भि |
| शौ ६१ | त्वम् अस्य् आवपनी जनानाम् अदिति× कामदुघा विश्वरूपा । | विमइयावपनी * * कामधुगा * |
| | यत् त ऊन तत् त आ पूरयाति प्रजापति× प्रजाभिस् सविदान ॥१०॥ | * तौनन्नत्ता * * * सविदानाम् ॥१०॥ |
| | ॥का॰६॥ ॥अनु॰१॥ | [फइच का ६॥ |
| | | इत्यथर्वणिके सप्तादश काण्डे प्रथमो नुवाक ॥ |

१७ ७

| | | |
|---|---|---|
| शौ १० ७ ? | कस्मिन्न् अङ्गे तपो ऽस्याधि तिष्ठति कस्मिन्न् अङ्ग ऋतम् अस्याध्य् आहितम् । | तिष्ठत |
| | क्व व्रत क्व श्रद्धास्य तिष्ठति कस्मिन्न् अङ्गे सत्यम् अस्य प्रतिष्ठितम् ॥१॥ | * * क्व * तिष्ठत |
| | क्व ब्रह्म क्व तिष्ठन्त्य् आप× कस्मिन्न् अङ्गे दिशो ऽस्य प्रतिष्ठिता. । | प्रतिष्ठता |
| | कतमद् अङ्गम् अनु सचरेत अहोरात्रे सविदाने समानम् ॥२॥ | |
| शौ ३ | कस्मिन्न् अङ्गे तिष्ठति भूमिर् अस्य कस्मिन्न् अङ्गे तिष्ठत्य् अन्तरिक्षम् । | तस्मिन्न् |
| | कस्मिन्न् अङ्गे तिष्ठत्य् आहिता द्यौ× कस्मिन्न् अङ्गे तिष्ठत्य् उत्तर दिवः ॥३॥ | तस्मिन्न्. |
| शौ २ | कस्माद् अङ्गाद् दीप्यते अग्निर् अस्य कस्माद् अङ्गात् पवते मातरिश्वा । | |
| | कस्माद् अङ्गाद् वि मिमीते ऽधि चन्द्रमा[स्] स्कम्भस्य महद् विमिमानो अङ्गम् ॥४॥ | * * र दिमिमानो |
| | | अङ्ग |
| शौ ४ | क्व प्रेप्सन् दीप्यत ऊर्ध्वो ऽग्नि× क्व प्रेप्सन् पवते मातरिश्वा । | * प्रीप्म दीप्यर्ध्वो सि * प्रेप्स * * |

| | | |
|---|---|---|
| | यत्र प्रेप्सन्तीर् अभियन्त्य् आवृत[स्] स्कम्भ [तं ब्रूहि कतमस् स्विद् एव स ] ॥५॥ | * प्रीप्मन्तीर्... |
| शौ ६ | क प्रप्सन्ती युवती विरूपे अहोरात्रे द्रवतस् सविदाने । | * प्रीप्सन्ती * वरूपे * द्रवितस् * |
| | यत्र प्रेप्सन्तीर् अभियन्त्य् आपस् स्कम्भं [तं ब्रूहि कतमस् स्विद् एव स.] ॥६॥ | * प्रीप्मन्तीर् |
| शौ ५ | कार्धमासा× क यन्ति मासास् संवत्सरेण सह सविदाना । | * कव सा * |
| | यत्र यन्त्य् ऋतवो यत्रार्तवा[स्] स्कम्भ [त ब्रूहि कतमस् स्विद् एव स ]॥७॥ | |
| शौ ७ | यस्मिन् स्तब्ध्वा प्रजापतिर् लोकान् सर्वान् अधारयत् । | अस्मियो स्कप्वा |
| | स्कम्भ त ब्रूहि कतम[स्] स्विद् एव सः ॥८॥ | स्वद् * * |
| शौ ८ | यत् परमम् अवम यच् च मध्यम प्रजापतिस् ससृजे विश्वरूपम् । | मध्य |
| | कियता स्कम्भ[×] प्र विवेश तत्र यन् न प्राविशत् कियत् तद् [ब]भूव ॥९॥ | कीतास् * * * * यत्र च * कुतद् वद् * |
| शौ ९ | कियता स्कम्भ[×] प्र विवेश भूत कियद् भविष्यद् अन्व् आशय ऽस्य । | आशे * |
| | एक यद् अङ्गम् अकृणोत् सहस्रधा कियता स्कम्भ[×] प्र विवेश तत्र ॥१०॥ ॥का॰१॥ | * ॥१०॥ फडश्य का १॥ |

१७ ८

| | | |
|---|---|---|
| शौ १० ७ १० | यत्र लोकांश् च कोशाश् च[ापो] ब्रह्म [जना विदु । | |
| | [असच् च यत्र सच् चान्तस् स्कम्भ त ब्रूहि] कतम[स्] स्विद् एव स ॥१॥ | * स्वद् * * |
| शौ ११ | यत्र तप× पराक्रम्य ऋतम् धारयत्य् उत्तरम् । | |
| | व्रतं च यत्र श्रद्धा च प्रह्मापस् समाहिता[स्] स्कम्भं [न ब्रूहि कतमस् स्विद् एव स ] ॥२॥ | |
| शौ १२ | यस्मिन् भूमिर् अन्तरिक्षं द्यौर् यस्मिन् अध्य् आहिता । | अस्मि अस्मि च् * |
| | यत्राग्निश् चन्द्रमास् सूर्यो वातस् तिष्ठन्त्य् आर्पितास् [स्कम्भ त ब्रूहि कतमस् स्विद् एव स.] ॥३॥ | |
| शौ १३ | यस्य त्रयस्त्रिंशद् देवा [अ]ङ्ग सर्वे समाहिता । | |
| | स्कम्भ [न ब्रूहि कतमस् स्विद् एव स ] ॥४॥ | |
| शौ १४ | यत्र ऋषयो भूतकृत ऋचस् साम यजुर् मही । | |
| | एकऋषिर् यस्मिन्न् आर्पितस् स्कम्भ [त ब्रूहि कतमस् स्विद् एव स.] ॥५॥ | एकऋषिर्यषिर् * * * |
| शौ १६ | यस्य चतस्र× प्रदिशो नाड्यस् तिष्ठन्तु प्रथमा । | नाडयास * प्रप्यश |
| | यज्ञो [य]स्मिन् पराक्रान्तस् [स्कम्भ त ब्रूहि कतमस् स्विद् एव स ] ॥६॥ | |
| शौ १५ | यत्रामृत च मृत्युश् च पुरुषश् च समाहिता । | * * मृत्युर् यम * * * |
| | समुद्रो यस्य नाड्यस् स्कम्भ त ब्रूहि कतम[स्] स्विद् एव स ॥७॥ | * यश्च नाड्यास स्वद् * * |
| शौ १७ | ये पुरुषे ब्रह्म विदुस् ते स्कम्भम् अनुसंविदु । | अरसविदु |
| | यो वेद परमेष्ठिन यश् च वेद प्रजापतिम् । | प्रजापतीं |
| | ज्येष्ठ ये ब्राह्मण विदुस् ते स्क[म्भ]म् अनुसंविदु ॥८॥ | अरसविदु |
| शौ १८ | यस्य शिरो वैश्वानरश् चक्षुर् अङ्गिरसो ऽभवन् । | भुवम् |
| | अङ्गानि यस्य ऋतवस् स्कम्भ त ब्रूहि कतम[स्] स्विद् एव स ॥९॥ | * यस्यानव स्वद् * * |
| शौ १९ | यस्य ब्रह्म मुखम् आहुर् जिह्वां मधुकशाम् उत । | |
| | विराज यस्योध आहुस् स्कम्भ [न ब्रूहि कतमस् स्विद् एव स ] ॥२०॥ ॥का॰२॥ | * यस्योधाहुस * ॥१०॥ फ २ ॥ |

| | | |
|---|---|---|
| शौ १० ७ २०–२१ | १७ ९ | |

| | | |
|---|---|---|
| | यस्माद् ऋचो अपातक्षन यजुर् यस्माद् अपाकषन् । | अपाकषम् |
| | छन्दांसि यस्य लोमानि स्कम्भ त ब्रूहि कतम[स्] स्विद् एव स ॥१॥ | छन्दास स्वद् * * |
| | असच्छाखां प्रतिष्ठन्तीं परमम् इव जना विदु. । | |
| | उतो सन् मन्यन्ते ऽवरे यस्य शाखाम् उपासते ॥२॥ | * म |
| | यत्रादित्याश् च रुद्राश् च वसवश् च समाहिता । | |
